515

૫૧૫

ગ્રા. ૫૧૫

बौद्धाचार्यवसुबन्धुप्रणीताः -

# अभिधर्मकोशकारिकाः

टिब्बत (भोट) देशसम्प्राप्त प्राचीनाह्
स्तिताभिधर्मकोश ग्रन्थानुसारेण ~~रोमना अक्षरे~~
V. V. गोखले सम्पादितग्रन्थमवलम्ब्य
देवनागरीलिप्यां ~~[illegible]~~ । लिखिताः।

मुनि भुवनविजयजी
मुनि जम्बूवि०।

છઠ્ઠા ડોળીસ્થાનના ૨૬ મા ડાબડામાં
શ્રુત ચિન્તામય શબ્દ છે

# अभिधर्मकोशकारिकाः

२८१·५९५

णमोत्थु णं समणस्स भगवओ महावीरस्स॥

॥ शासनमिदं जैनं जयत्यूर्जितम् ॥

स्थित्यु-त्पत्ति-व्ययात्म प्रभवति हि सतां प्रीतये वस्तु जैनम्॥

## बौद्धाचार्य वसुबन्धुप्रणीता अभिधर्मकोशकारिकाः॥

[धातुनिर्देशो नाम] * नमो बुद्धाय * [प्रथमं कोशस्थानम्]

यः सर्वथा सर्वहतान्धकारः संसारपङ्काज्जगदुद्धार।

तस्मै नमस्कृत्य यथार्थशास्त्रे शास्त्रं प्रवक्ष्याम्यभिधर्मकोशम्॥१॥

[प्रज्ञा]ऽमला सानुचराऽभिधर्मः तत्प्राप्तये याऽपि च यच्च शास्त्रम्।

तस्यार्थतोऽस्मिन् समनुप्रवेशात् स वाऽऽश्रयोऽस्येत्यभिधर्मकोषः॥२॥

~~प्रज्ञान्ना~~ धर्माणां प्रविचयमन्तरेण नास्ति क्लेशानां यत उपशान्तयेऽभ्युपायः।

क्लेशैश्च भवति भवार्णवे~~ऽस्मिन्~~त्र लोकस्तद्धेतोरत उदितः किलैष शास्त्रा॥३॥

सास्रवाऽनास्रवा धर्माः संस्कृता मार्गवर्जिताः।

सास्रवा आस्रवास्तेषु यस्मात् समनुशेरते॥४॥

अनास्रवं मार्गसत्यं त्रिविधं चाप्यसंस्कृतम्।

आकाशं द्वौ निरोधौ च त[त्राकाशमनावृतिः]॥५॥

प्रतिसङ्ख्यानिरोधो यो विसंयोगः पृथक् पृथक्।

उत्पादात्यन्तविघ्नो[ऽन्यो]निरोधोऽप्रतिसङ्ख्यया॥६॥

ते पुनः संस्कृता धर्मा रूपादिस्कन्धपञ्चकम्।

त एवाऽध्वा कथावस्तु सनिःसाराः सवस्तुकाः॥७॥

ये सास्रवा उपादानस्कन्धास्ते सरणा अपि।

दुःखं समुदयो लोको दृष्टिस्थानं भवश्च ते ॥८॥

रूपं पञ्चेन्द्रियाण्यर्थाः पञ्चाऽविज्ञप्तिरेव च।
तद्विज्ञानाश्रया रूपप्रसादाश्चक्षुरादयः ॥९॥
रूपं द्विधा विंशतिधा शब्दस्त्वष्टविधो रसः।
षोढा चतुर्विधो गन्धः स्पृश्यमेकादशात्मकम् ॥१०॥
विक्षिप्ताचित्तकस्यापि योऽनुबन्धः शुभाशुभः।
महाभूतान्युपादाय सह्यविज्ञप्तिरुच्यते ॥११॥
भूतानि पृथिवीधातुरप्-तेजो-वायुधातवः।
धृत्यादिकर्मसंसिद्धाः खर-स्नेहो-ष्णतेरणाः ॥१२॥
पृथिवी वर्णसंस्थानमुच्यते लोकसंज्ञया।
आपस्तेजश्च वायुस्तु धातुरेव तथापि च ॥१३॥
इन्द्रियार्थास्त एवे[redacted]ष्टा दशायतनधातवः।
वेदनानुभवः संज्ञा निमित्तोद्ग्रहणात्मिका ॥१४॥
चतुर्भ्योऽन्ये तु संस्कार[redacted]स्कन्ध. एते पुनस्त्रयः।
धर्मायतनधात्वाख्याः सहाविज्ञप्त्यसंस्कृतैः ॥१५॥
विज्ञानं प्रतिविज्ञप्तिर्मन आयतनं च तत्।
धातवः सप्त च मताः षड्विज्ञानान्यथो मनः ॥१६॥

षण्णामनन्तरातीतं विज्ञानं यद्धि तन्मनः।
षष्ठाश्रयप्रसिद्ध्य[र्थं] धातवोऽष्टादश स्मृताः॥१७॥
सर्वसंग्रह ~~स्कन्धेन~~ एकेन स्कन्धेनायतनेन च।
धातुना च स्वभावेन परभाववियोगतः॥१८॥
जातिगोचर~~[illegible]~~विज्ञानसामान्यादेकधातुता।
[द्वि]त्वेऽपि चक्षुरादीनां शोभार्थं तु द्वयोद्भवः॥१९॥
राश्यायद्वारं गोत्रार्थाः स्कन्धायतनधातवः।
फ त्रैधात् L.V.P. मोहेन्द्रियरुचित्रैधात् (फ) तिस्रः स्कन्धादिदेशनाः॥२०॥
विवादमूलसंसारहेतुत्वात् क्रमकारणात्।
चैत्तेभ्यो वेदनासंज्ञे पृथक् स्कन्धौ निवेशितौ॥२१॥
स्कन्धेष्वसंस्कृतं नोक्तमर्थायोगात् क्रमः पुनः।
यथौदारिकसंक्लेशभाजनाद्यर्थधातुतः॥२२॥
प्राक् पञ्च वार्तमानार्थ्याद् भौतिकार्थ्याच्चतुष्टयम्।
दूराशुतरवृत्त्यान्यद् यथास्थानं क्रमोऽथवा॥२३॥
विशेषणार्थं प्राधान्याद् बहुधर्माग्रसंग्रहात्।
एकमायतनं रूपमेकं धर्माख्यमुच्यते॥२४॥
धर्मस्कन्धसहस्राणि यान्यशीतिं जगौ मुनिः।

तानि वाङ् नाम चेत्येषां रूपसंस्कारसंग्रहः ॥२५॥

शास्त्रप्रमाण इत्येके स्कन्धादीनां कथैकशः।
चरितप्रतिपक्षस्तु धर्मस्कन्धोऽनुवर्णितः॥२६॥
तथाऽन्येऽपि यथायोगं स्कन्धायतनधातवः।
प्रतिपाद्या यथोक्तेषु सम्प्रधार्य स्वलक्षणम् ॥२७॥
छिद्रमाकाशधात्वाख्यमालोकतमसी किल।
फ निश्रयाः M.S.
विज्ञानधातुर्विज्ञानं सास्रवं जन्मनिश्रयः ॥२८॥
सनिदर्शनमेकोऽत्र रूपं सप्रतिघा दश।
रूपिणोऽव्याकृता अष्टौ त एवारूपशब्दकाः ॥२९॥
त्रिधाऽन्ये कामधात्वाप्ताः सर्वे रूपे चतुर्दश।
विना गन्धरसघ्राणजिह्वाविज्ञानधातुभिः ॥३०॥
आरूप्याप्ता मनोधर्ममनोविज्ञानधातवः।
सास्रवानास्रवा एते त्रयः शेषास्तु सास्रवाः ॥३१॥
सवितर्कविचारा हि पञ्च विज्ञानधातवः।
अन्त्यास्त्रयस्त्रिप्रकाराः शेषा उभयवर्जिताः ॥३२॥
निरूपणानुस्मरणविकल्पेनाऽविकल्पकाः।
तौ प्रज्ञा मानसी व्यग्रा स्मृतिः सर्वैव मानसी ॥३३॥

सप्त सालम्बनाश्चित्तधातवो ऽर्धं च धर्मतः।
नवानुपात्तास्ते चाष्टौ शब्दश्चान्ये नव द्विधा ॥३४॥
स्प्रष्टव्यं द्विविधं शेषा रू[पिणो] नव भौतिकाः।
धर्मधात्वेकदेशश्च सञ्चिता दशरूपिणः ॥३५॥
छिनत्ति छिद्यते चैव बाह्यं धातुचतुष्टयम्।
दह्यते तुलयत्येवं विवादो दग्धृतुल्ययोः ॥३६॥
विपाकजौपचयिकाः पञ्चाध्यात्मं विपाकजाः।
न शब्दोऽप्रतिघा अष्टौ नैष्यन्दिकविपाकजाः ॥३७॥
त्रिधाऽन्ये द्रव्यवानेकः क्षणिकाः पश्चिमास्त्रयः।
चक्षुर्विज्ञानधात्वोः स्यात् पृथग्लाभः सहापि च ॥३८॥
द्वादशाऽऽध्यात्मिकान् हित्वा रूपादीन् धर्मसंज्ञकः।
सभागस्तत्सभागाश्च शेषा यो न स्वकर्मकृत् ॥३९॥
दश भावनया हेयाः पञ्च चान्त्यास्त्रयस्त्रिधा।
न दृष्टिहेयमक्लिष्टं न रूपं नाप्यषष्ठजम् ॥४०॥
चक्षुश्च धर्मधातोश्च प्रदेशो दृष्टिरष्टधा।
पञ्च विज्ञानसहजा धीर्न दृष्टिरतीरणात् ॥४१॥
चक्षुः पश्यति रूपाणि सभागं न तदाश्रितम्।

विज्ञानं दृश्यते रूपं न किलान्तरितं यतः ॥४२॥

उभाभ्यामपि चक्षुर्भ्यां पश्यति व्यक्तदर्शनात् ।
चक्षुःश्रोत्रमनोऽप्राप्तविषयं त्रयमन्यथा ॥४३॥

त्रिभिर्घ्राणादिभिस्तुल्यविषयं ग्रहणं मतम् ।
चरमस्याश्रयोऽतीतः पञ्चानां सहजश्च तैः ॥४४॥

तद्विकारविकारित्वादाश्रयाश्चक्षुरादयः ।
अतोऽसाधारणत्वाच्च विज्ञानं तैर्निरुच्यते ॥४५॥

न कायस्याधरं चक्षुरूर्ध्वं रूपं न चक्षुषः ।
विज्ञानं चास्य रूपं तु कायस्योभे च सर्वतः ॥४६॥

तथा श्रोत्रं त्रयाणां तु सर्वमेव स्वभूमिकम् ।
कायविज्ञानमधरस्वभूम्यनियतं मनः ॥४७॥

पञ्च बाह्या द्विविज्ञेया नित्या धर्मा असंस्कृताः ।
धर्मार्धमिन्द्रियं ये च द्वादशाध्यात्मिकाः स्मृताः ॥४८॥

॥ धातुनिर्देशो नाम प्रथमं कोशस्थानम् ॥

श. L.V.P.

[अथ इन्द्रियनिर्देशो नाम द्वितीयं कोशस्थानम्]

चतुर्ष्वर्थेषु पञ्चानामाधिपत्यं द्वयोः किल।
चतुर्णां पञ्चकाष्टानां संक्लेशव्यवदानयोः॥१॥
स्वार्थोपलब्ध्याधिपत्यात् सर्वस्य च षडिन्द्रियम्।
स्त्रीत्व-पुंस्त्वाधिपत्यात्तु कायात् स्त्रीपुरुषेन्द्रिये॥२॥
निकायस्थितिसंक्लेशव्यवदानाधिपत्यतः।
जीवितं वेदनाः पञ्च श्रद्धाद्याश्चेन्द्रियं मनः॥३॥
आज्ञास्याम्याख्यमाज्ञाख्यमाज्ञातावीन्द्रियं तथा।
उत्तरोत्तरसम्प्राप्तिनिर्वाणाद्याधिपत्यतः॥४॥
चित्ताश्रयस्तद्विकल्पः स्थितिः संकल्प एव च।
*°वदेताव° L.V.P. सम्भारो व्यवदानं च याव*ता तावदिन्द्रियम्॥५॥
प्रवृत्तेराश्रयोत्पत्तिस्थितिप्रत्युपभोगतः।
चतुर्दश तथाऽन्यानि निवृत्तेरिन्द्रियाणि वा॥६॥
सुखेन्द्रियमसाता वा कायिकी वेदना सुखम्।
साता ध्याने तृतीये तु चैतसी सा सुखेन्द्रियम्॥७॥
अन्यत्र सा सौमनस्यमसाता चैतसी पुनः।
दौर्मनस्यमुपेक्षा तु मध्योभयविकल्पनात्॥८॥
दृग्भावनाऽशैक्षपथे नव त्रीण्यमलं त्रयम्।

रूपीणि जीवितं दुःखे सास्रवाणि द्विधा नव ॥९॥

विपाको जीवितं द्वेधा द्वादशान्त्याष्टकादृते ।

ॐ नव L.V.P.

दौर्मनस्याच्च तत्त्वेकं सविपाकं ॐदश द्विधा ॥१०॥

मनोऽन्यवित्तिश्रद्धादीन्यष्टकं कुशलं द्विधा ।

दौर्मनस्यं मनोन्याच्च वित्तिस्त्रेधान्यदेकधा ॥११॥

कामाप्तममलं हित्वा रूपाप्तं स्त्रीपुमिन्द्रिये ।

दुःखे च हित्वाऽरूप्याप्तं सुखे चापोह्य रूपि च ॥१२॥

मनोवित्तित्रयं त्रेधा द्विहेया दुर्मनस्कता ।

नवभावनया पञ्च त्वहेयान्यपि न त्रयम् ॥१३॥

कामेष्वादौ विपाकौ द्वे लभ्येते नोपपादुकैः ।

तैः षड्वा सप्त वाऽष्टौ वा षड् रूपेष्वेकमुत्तरे ॥१४॥

निरोधयत्युपरमान्नारूप्ये जीवितं मनः ।

उपेक्षां चैव रूपेऽष्टौ कामे दश नवाष्ट वा ॥१५॥

काममृत्यौ तु चत्वारि शुभे सर्वत्र पञ्च च ।

नवाप्तिरन्त्यफलयोः सप्ताष्टनवभिर्द्वयोः ॥१६॥

& रर्हत्व- M.S.

एकादशभिरर्हत्त्वमुक्तं त्वेकस्य सम्भवात् ।

उपेक्षाजीवितमनोयुक्तोऽवश्यं त्रयान्वितः ॥१७॥

चतुर्भिः सुखकायाभ्यां पञ्चभिश्चक्षुरादिमान् ।

सौमनस्यी च दुःखी तु सप्तभिः स्त्रीन्द्रियादिमान् ॥१८॥

अष्टाभिरेकादशभिस्त्वाज्ञास्यातेन्द्रियान्वितः।
आज्ञास्यामीन्द्रियोपेतस्त्रयोदशभिरन्वितः ॥१९॥
सर्वाल्पैर्निःशुभोऽष्टाभिर्विन्मनःकायजीवितैः।
युक्तो बालस्तथाऽऽरूप्ये उपेक्षायुर्मनःशुभैः ॥२०॥
बहुभिर्युक्त एकान्नविंशत्याऽमलवर्जितैः।
द्विलिङ्ग आर्यरागयेकलिङ्गद्व्यमलवर्जितैः ॥२१॥
कामेऽष्टद्रव्यकोऽशब्दः परमाणुरनीन्द्रियः।
* न्द्रियो L.V.P. कायेन्द्रियी* नवद्रव्यो दशद्रव्योऽपरेन्द्रियः ॥२२॥
चित्त-चैत्ताः सहावश्यं सर्वं संस्कृतलक्षणैः।
प्राप्त्या वा पञ्चधा चैत्ता महाभूम्यादिभेदतः ॥२३॥
वेदना चेतना संज्ञा छन्दः स्पर्शो मतिः स्मृतिः।
मनस्कारोऽधिमोक्षश्च समाधिः सर्वचेतसि ॥२४॥
श्रद्धाऽप्रमादः प्रश्रब्धिरुपेक्षा ह्रीरपत्रपा।
卐 मविहिंसा वीर्यं L.V.P. मूलद्वयम卐हिंसा च वीर्यं च कुशले सदा ॥२५॥
मोहः प्रमादः कौसीद्यमाश्रद्धं♥ स्त्यानमुद्धवः। ♥ उद्धतः M.S.
क्लिष्टे सदैवाकुशले त्वाह्रीक्यमनपत्रपा ॥२६॥

क्रोधोपनाहशाठ्येर्ष्याप्रदासम्रक्षमत्सराः। [5] प्रमाद L.V.P.

मायामदविहिंसाश्च परीत्तक्लेशभूमिकाः ॥२७॥

सवितर्कविचारत्वात् कुशले कामचेतसि।

द्वाविंशति[श्चैतसि]काः कौकृत्यमधिकं क्वचित् ॥२८॥

आवेणिके त्वकुशले दृष्टियुक्ते च विंशतिः।

क्लेशैश्चतुर्भिः क्रोधाद्यैः कौकृत्येनैकविंशतिः ॥२९॥

निवृत्तेऽष्टादशाऽन्यत्र द्वादशाऽव्याकृते मताः।

मिद्धं सर्वाविरोधित्वाद् यत्र स्यादधिकं हि तत् ॥३०॥

कौकृत्यमिद्धाकुशलान्याद्ये ध्याने न सन्त्यतः।

ध्यानान्तरे वितर्कश्च विचारश्चाप्यतः परम् ॥३१॥

[&] ऽभयद- L.V.P. अह्रीरगुरुतावद्ये भयादर्शित्वमत्रपा।

प्रेम श्रद्धा गुरुत्वं ह्रीस्ते पुनः कामरूपयोः ॥३२॥

[ф] वौद्धत्य L.V.P. वितर्कचारावौदार्यसूक्ष्मते मान उन्नतिः।

मदः स्वधर्मे रक्तस्य पर्यादानं तु चेतसः ॥३३॥

चित्तं मनोऽथ विज्ञानमेकार्थं चित्तचैतसाः।

साश्रयालम्बनाकाराः सम्प्रयुक्ताश्च पञ्चधा ॥३४॥

विप्रयुक्तास्तु संस्काराः प्राप्त्यप्राप्ती सभागता।

आसंज्ञिकं समापत्ती जीवितं लक्षणानि च ॥३५॥

फ॰ भसम॰ M.S. | नामकायादयश्चेति प्राप्तिलाभः समन्वयः।

प्राप्त्यप्राप्ती स्वसन्तानपतितानां निरोधयोः ॥३६॥
त्रैयध्विकानां त्रिविधा शुभादीनां शुभादिका।
स्वधातुका तदाप्तानामनाप्तानां चतुर्विधा ॥३७॥
त्रिधा न शैक्षाशैक्षाणामहेयानां द्विधा मता।
अव्याकृताप्तिः सहजाऽभिज्ञानैर्माणिकादृते ॥३८॥
निवृतस्य च रूपस्य कामे रूपस्य नाग्रजा।
अक्लिष्टाव्याकृताऽप्राप्तिः सातीताजातयोस्त्रिधा ॥३९॥
कामाद्याप्तामलानां च मार्गस्याप्राप्तिरिष्यते।
पृथग्जनत्वं तत्प्राप्तिभूसञ्चाराद् विहीयते ॥४०॥
सभागता सत्त्वसाम्यमासंज्ञिकमसंज्ञिषु।
निरोधश्चित्त-चैत्तानां विपाकस्ते बृहत्फलाः ॥४१॥
तथाऽसंज्ञिसमापत्तिर्ध्यानेऽन्त्ये निःसृतीच्छया।
शुभोपपद्यवेद्यैव नार्यस्यैकाध्विकाप्यते ॥४१॥
निरोधाख्या तथैवेयं विहारार्थं भवाग्रजा।
शुभा द्विवेद्याऽनियता चार्यस्याप्यप्रयोगतः ॥४३॥
बोधिलभ्या मुनेर्न प्राक् चतुस्त्रिंशत्क्षणाप्तितः
कामरूपाश्रये तूभे निरोधाख्यादितो नृषु ॥४४॥

आयुर्जीवितमाधार उष्मविज्ञानयोर्हि यः।
लक्षणानि पुनर्जातिर्जरा स्थितिरनित्यता ॥४५॥
जातिजात्यादयस्तेषां तेऽष्टधर्मैकवृत्तयः।
जन्यस्य जनिका जातिर्न हेतुप्रत्ययैर्विना ॥४६॥
नामकायादयः संज्ञा वाक्याक्षरसमुच्चयः।
कामरूपाप्तसत्त्वाख्या निष्यन्दाः व्याकृतास्तथा ॥४७॥
सभागता विपाकोऽपि त्रैधातुक्याप्तयो द्विधा।
लक्षणानि च निष्यन्दाः समापत्त्यसमन्वयाः ॥४८॥
कारणं सहभूश्चैव सभागः सम्प्रयुक्तकः।
सर्वत्रगो विपाकाख्यः षड्विधो हेतुरिष्यते ॥४९॥
स्वतोऽन्ये कारणं हेतुः सहभूर्ये मिथःफलाः।
भूतवच्चित्तचित्तानुवर्तिलक्षणलक्ष्यवत् ॥५०॥
चैत्ता द्वौ संवरौ तेषां चेतसो लक्षणानि च।
चित्तानुवर्तिनः कालफलादिशुभतादिभिः ॥५१॥
सभागहेतुः सदृशाः स्वनिकायभुवोऽग्रजाः।
अन्योन्यं नवभूमिस्तु मार्गः समविशिष्टयोः ॥५२॥
प्रयोगजास्तयोरेव श्रुतचिन्तामयादिकाः।
सम्प्रयुक्तकहेतुस्तु चित्तचैत्ताः समाश्रयाः ॥५३॥

सर्वत्रगाख्यः क्लिष्टानां स्वभूमौ पूर्वसर्वगाः।
विपाकहेतुरशुभाः कुशलाश्चैव साश्रवाः ॥५४॥

सर्वत्रगः सभागश्च द्व्यध्वगौ त्र्यध्वगास्त्रयः।
संस्कृतं सविसंयोगं फलं नासंस्कृतस्य ते ॥५५॥

LVP कः
विपाक् फलमन्त्यस्य पूर्वस्याधिपतं फलम्।
सभागसर्वत्रगयोर्निष्यन्दः पौरुषं द्वयोः ॥५६॥

विपाकोऽव्याकृतो धर्मः सत्त्वाख्यो व्याकृतोद्भवः।
निष्यन्दो हेतुसदृशो विसंयोगः क्षयो धिया ॥५७॥

यद्बलाज्जायते यत् तत् फलं पुरुषकारजम्।
अपूर्वः संस्कृतस्यैव संस्कृतोऽधिपतेः फलम् ॥५८॥

वर्तमानाः फलं पञ्च गृह्णन्ति द्वौ प्रयच्छतः।
वर्तमानाभ्यतीतौ द्वावेकोऽतीतः प्रयच्छति ॥५९॥

क्लिष्टा विपाकजाः शेषाः प्रथमार्या यथाक्रमम्।
विपाकं सर्वगं हित्वा तौ सभागं च शेषजाः ॥६०॥

चित्तचैत्तास्तथान्येऽपि सम्प्रयुक्तकवर्जिताः।
चत्वारः प्रत्यया उक्ता हेत्वाख्याः पञ्च हेतवः ॥६१॥

चित्तचैत्ता अचरमा उत्पन्नाः समनन्तरः।
आलम्बनं सर्वधर्माः कारणाख्योऽधिपः स्मृतः ॥६२॥

निरुद्धमाने कारित्रं द्वौ हेतू कुरुतस्त्रयः।

LVP ध्य

जायमाने ततोऽन्यौ तु प्रत्ययौ तद्विपर्ययात् ॥६३॥

चतुर्भिश्चित्तचैत्ता हि समापत्तिद्वयं त्रिभिः।

द्वाभ्यामन्ये तु जायन्ते नेश्वरादेः क्रमादिभिः ॥६४॥

द्विधा भूतानि तद्धेतुर्भौतिकस्य तु पञ्चधा।

त्रिधा भौतिकमन्योन्यं भूतानामेकधैव तत् ॥६५॥

cf.?!

कुशलाकुशलं कामे निवृत्तानिवृतं मनः।

रूपारूप्येष्वकुशलादन्यत्रानास्रवं द्विधा ॥६६॥

कामे नव शुभाच्चित्ताच्चित्तान्यष्टाभ्य एव तत्।

LVP ष्ट

दशभ्योऽकुशलं तस्माच्चत्वारि निवृतं तथा ॥६७॥

पञ्चभ्यो निवृतं तस्मात् सप्त चित्तान्यनन्तरम्।

रूपे दशैकं च शुभान्नवभ्यस्तदनन्तरम् ॥६८॥

अष्टाभ्यो निवृतं तस्मात् षट्भ्योऽनिवृतं पुनः

तस्मात् षडेवमारूप्ये तस्य नीतिः शुभा पुनः ॥६९॥

नव चित्तानि तत्षट्कां नि(ट्कान्नि?)वृतात् सप्त तत्तथा।

चतुर्भ्यः शैक्षमस्मात्तु पञ्चाशैक्षं तु पञ्चकात् ॥७०॥

तस्माच्चत्वारि चित्तानि द्वादशैतानि विंशतिः।

प्रायोगिकोपपत्त्याप्तं शुभं भित्वा त्रिषु द्विधा ॥७१॥

LVP त्त्वा

विपाकजैर्यापथिक शैल्पस्थानिकनैर्मितम्

चतुर्धाऽव्याकृतं कामे रूपे शिल्पविवर्जितम् ॥७२॥
क्लिष्टे त्रैधातुके लाभः षण्णां षण्णां द्वयोः शुभे।
त्रयाणां रूपजे शैक्षे चतुर्णां तस्य शोभिते ॥७३॥

॥ इन्द्रियनिर्देशो नाम द्वितीयं कोशस्थानम् ॥

① add here: [illegible]

LVP ना  LVP ड्

नरकप्रेततिर्यञ्चो मनुष्याः षट्‌ दिवौकसः।
काम धातुः स नरक द्वीप भेदेन विंशतिः ॥१॥
ऊर्ध्वं सप्तदशस्थानो रूपधातुः पृथक् पृथक्
ध्यानं त्रिभूमिकं तत्र चतुर्थं त्वष्टभूमिकम् ॥२॥
आरूप्यधातुरस्थान उपपत्त्या चतुर्विधः।
निकायं जीवितं तत्र निश्रिता चित्तसन्ततिः॥३॥
नरकादिस्वनामोक्ता गतयः पञ्च तेषु ताः।
अक्लिष्टाव्याकृता एव सत्वाख्या नान्तराभवः ॥४॥
नानात्वकायसंज्ञाश्च नानाकायैकसंज्ञिनः।
विपर्ययाच्चैककायसंज्ञाश्चारूपिणस्त्रयः ॥५॥
विज्ञानस्थितयः सप्त शेषं तत्परिभेदवत्।
भवाग्रासंज्ञिसत्वाश्च सत्वावासा नव स्मृताः ॥६॥
अनिच्छावसनान्नान्ये चतस्रः स्थितयः पुनः।
चत्वारः साश्रवाः स्कन्धाः स्वभूमावेव केवलम् ॥७॥

LVP ति:

विज्ञानं न स्थितिप्रोक्तं चतुष्कोटि तु संग्रहे।

चतस्रो योनयस्तत्र सत्वानामण्डजादयः ॥८॥

चतुर्धा नरतिर्यञ्चो नारका उपपादुकाः।

अन्तराभवदेहाश्च प्रेता अपि जरायुजाः॥९॥

मृत्यूपपत्तिभवयोरन्तरा भवतीह यः।

गम्यदेशानुपेतत्वान्नोपपन्नोऽन्तराभवः॥१०॥

व्रीहिसन्तानसाधर्म्यादविच्छिन्नभवोद्भवः।

प्रतिबिम्बमसिद्धत्वादसाम्याच्चानिदर्शनम् ॥११॥

सहैकत्र द्वयाभावादसन्तानाद्द्वयोदयात्।

कण्ठोक्तेश्चास्ति गन्धर्वात् पंचोक्तेर्गतिसूत्रतः॥१२॥

एकाक्षेपादसावैष्यत् पूर्वकालभवाकृतिः।

स पुनर्मरणात् पूर्व उपपत्तिक्षणात् परः॥१३॥

सजातिशुद्धदिव्याक्षिदृश्यः कर्मर्द्धिवेगवान्।

सकलाक्षोऽप्रतिघवाननिवर्त्यः स गन्धभुक्॥१४॥

विप[र्यस्तमतिर्याति ग]तिदेशं रिरंसया।
LVP

गन्धस्थानाभिकामोऽन्य ऊर्ध्वपादस्तु नारकः॥१५॥

सम्प्रजानन् विशत्येकस्तिष्ठत्यप्यपरोऽपरः।

निष्क्रामत्यपि सर्वाणि मूढोऽन्यो नित्यमण्डजः॥१६॥

[LVP वौ]

गर्भावक्रान्त्ययुक्तिसत्त्वचक्रवर्तिस्वयंभुवाम्।

कर्मज्ञानोभयेषां वा विशदत्वाद्यथाक्रमम् ॥१७॥

नात्मास्ति स्कन्धमात्रं तु क्लेशकर्माभिसंस्कृतः।

*अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत् ॥१८॥*
*यथाक्षेपं क्रमाद्वृद्धः सन्तानः क्लेशकर्मभिः।*

परलोकं पुनर्यातीत्यनादि भवचक्रकम् ॥१९॥

स प्रतीत्यसमुत्पादो द्वादशाङ्गस्त्रिकाण्डकः।

पूर्वापरान्तयोर्द्वे द्वे मध्येऽष्टौ परिपूरिणः ॥२०॥

पूर्वं क्लेशदशाऽविद्या संस्काराः पूर्वकर्मणः।

सन्धिस्कन्धास्तु विज्ञानं नामरूपमतः परम् ॥२१॥

प्राक् षडायतनोत्पादात्तत्पूर्वं त्रिकसंगमात्।

स्पर्शः प्राक् सुखदुःखादिकारणज्ञानशक्तितः ॥२२॥

वित्तिः प्राङ्मैथुनात्तृष्णा भोगमैथुनरागिणः।

उपादानं तु भोगानां प्राप्तये परिधावतः ॥२३॥

स [भविष्यद्भ]वफलं कुरुते कर्म तद्भवः।

प्रतिसन्धिः पुनर्जातिजरामरणमाविदः ॥२४॥

आवस्थिकः किलेष्टोऽयं प्राधान्यात्त्वङ्गकीर्तनम्।

[LVP र्व]

पूर्वापरान्तमध्येषु संमोहविनिवृत्तये ॥२५॥

[LVP शा]

क्लेशास्त्रीणि द्वयं कर्म सप्त वस्तु फलं तथा।

फलहेत्वभिसंक्षेपो द्वयोर्मध्यानुमानतः ॥२६॥

क्लेशात्क्लेशः क्रिया चैव ~~[struck out]~~ ततो वस्तु ततः पुनः।
वस्तु क्लेशाश्च जायन्ते भवाङ्गानामयं नयः ॥२७॥
हेतुरत्र समुत्पादः समुत्पन्नं फलं मतम्।
विद्याविपक्षो धर्मोऽन्योऽविद्याऽमित्रानृतादिवत् ॥२८॥
संयोजनादिवचनात् कुप्रज्ञा चेन्न दर्शनात्।
दृष्टेस्तत्सम्प्रयुक्तत्वात् प्रज्ञोपक्लेशदर्शनात् ॥२९॥
नाम त्वरूपिणः स्कन्धाः स्पर्शाः षट् सन्निपातजाः।
LVP शाः
पञ्च प्रतिघसंस्पर्शः षष्ठोऽधिवचनाह्वयः ॥३०॥
विद्याविद्येतरस्पर्शा अमलक्लिष्टशेषिताः।
LVP सु
व्यापादानुनयस्पर्शौ सुखे वेद्यादयस्त्रयः ॥३१॥
तज्जाः षड् वेदनाः पञ्च कायिकी चैतसी पराः
रा LVP
पुनश्चाष्टादशविधा सा मनोपविचारतः ॥३२॥
कामे सालम्बनाः सर्वे रूपी द्वादशगोचरः।
त्रयाणामुत्तरो ध्यानद्वये द्वादश कामगाः ॥३३॥
स्वोऽष्टालम्बनमारूप्यो द्वयोर्ध्यानद्वये तु षट्।
LVP र्णां
कामाः षण्णां चतुर्णां स्व एकस्यालम्बनं परः ॥३४॥
चत्वारोऽरूपिसामन्ते रूपगा एक उर्ध्वगः।
एको मौले स्वविषयः सर्वेऽष्टादश सास्रवाः ॥३५॥

उक्तं च वक्ष्यते चान्यदत्र तु क्लेश इष्यते।

बीजवन्नागवन्मूलवृक्षवत्तुषवत्तथा ॥३६॥
तुषितण्डुलवत्कर्म तथैवौषधिपुष्पवत्।
सिद्धान्तपानवद्वस्तु तस्मिन् भवचतुष्टये ॥३७॥
उपपत्तिभवः क्लिष्टः सर्वक्लेशैः स्वभूमिकैः।
त्रिधान्ये त्रय आरूप्येष्वाहारस्थितिकं जगत् ॥३८॥
कवडीकार आहारः कामे त्र्यायतनात्मकः।
(LVP त्ति)
न रूपायतनं तेन स्वाक्षमुक्तानुग्रहात् ॥३९॥
स्पर्शसंचेतनाविज्ञा आहाराः साश्रवास्त्रिषु।
मनोमयः संभवैषी गन्धर्वश्चान्तराभवः ॥४०॥
(LVP स्वस्वभ)
निर्वृत्तिश्चेह पुष्ट्यर्थमाश्रयाश्रितयोर्द्वयम्।
(LVP र्वृ) द्वयमन्यभवाक्षेपनिर्वृत्त्यर्थं यथाक्रमम् ॥४१॥
छेदसन्धानवैराग्यहानिच्युत्युपपत्तयः।
म(नो)विज्ञान ए(वे)ष्टा उपेक्षायां च्युतोद्भवौ ॥४२॥
नैकाग्राचित्तयोरेतौ निर्वात्यव्याकृतद्वये।
(LVP द)
क्रमच्युतौ पादानाभिहृदयेषु मनश्च्युतिः ॥४३॥
अधो नृसुरगाजानां मर्मच्छेदः त्वबादिभिः।
सम्यङ्मिथ्यात्वनियता आर्यानन्तर्यकारिणः ॥४४॥

तत्र भाजनलोकस्य सँनिवेशमुशन्त्य[धः]॥

लक्षषोडशको द्वेधमसंख्यं वायुमण्डलम् ॥४५॥
अपामेकादशो द्वेधं सहस्राणि च विंशतिः।
अष्टलक्षोच्छ्रयं पश्चाच्छेषं भवति काञ्चनम् ॥४६॥
तिर्यक् त्रीणि सहस्राणि [सार्द्ध] शतचतुष्टयम् ।
लक्षद्वादशकं चैव जलकाञ्चनमण्डलम् ॥४७॥
समन्ततस्तु त्रिगुणं तत्र मेरुर्युगन्धरः।
LVP ध
ईषाधारः खदिरकः सुदर्शनगिरिस्तथा ॥४८॥
अश्वकर्णो विनतको निमिन्धरगिरिस्ततः।
LVP नि
द्वीपा बहिश्चक्रवाडः सप्त हैमाः स आयसः ॥४९॥
चतूरत्नमयो मेरुर्जलेऽशीतिसहस्रके ।
मग्न ऊर्ध्वं जलान्मेरुर्भूयोऽशीतिसहस्र[कः] ॥५०॥
अर्धार्धहानिरष्टासु समोच्छ्रयघनाश्च ते।
शीताः सप्तान्तराण्येषामाद्याशीतिसहस्रिका ॥५१॥
आभ्यन्तरः समुद्रोऽसौ त्रिगुणः स तु पार्श्वतः।
अर्धार्धेनाप[रा]ः सीताः शेषं बाह्यो महोदधिः ॥५२॥
लक्षत्रयं सहस्राणि विंशतिर्द्वे च तत्र तु।
जम्बूद्वीपो द्विसाहस्र[:]त्रिपार्श्वः शकटाकृतिः ॥५३॥

सार्धत्रियोजनं त्वेकं प्राग्विदेहोर्ध्वच[न्द्र]वत्।
पार्श्वत्रयं तथास्यैकं (सार्ध) त्रिशतयोजनम् ॥ ५४॥
गोदानीयः सहस्राणि सप्त सार्धानि मण्डलः।
सार्धे द्वे मध्यमस्याष्टौ चतुरस्रः कुरुः समः॥ ५५॥
देहा विदेहाः [कुर]वः कौरवाश्चामरा वराः।
? अष्टौ तदन्तरद्वीपाः शाठा उत्तरमन्त्रिणः॥ ५६॥
इहोत्तरेण कीटाद्रि नवकाद्रिभवांस्ततः।
पञ्चाशद्विस्तृतायामं सरोऽर्वाग् गन्धमादनात् ॥५७॥
अधः सहस्रैर्विंशत्या तन्मात्रोऽवीचिरस्य हि।
तदूर्ध्वं सप्त नरकाः सर्वेऽष्टौ षोडशोत्सदाः॥५८॥
कुकूलं कुणपं चाथ क्षुरमार्गादिकं नदी
तेषां चतुर्दिशं शीता (LVP पंचैव) अन्येऽष्टावर्बुदादयः॥५९॥
अर्धेन मेरोश्चन्द्रार्कौ पंचाशत्सैकयोजनौ।
अर्धरात्रोऽस्तगमनं मध्याह्न उदयः सकृत् (LVP [समम्]) ॥६०॥
प्रावृण्मासे द्वितीयेऽन्त्यनवम्यां वर्धते निशा।
हेमन्तानां चतुर्थे तु हीयतेऽहर्विपर्ययात् ॥६१॥
लवशो रात्र्यहर्वृद्धी दक्षिणोत्तरगे रवौ।
स्वच्छायया र्कसामीप्याद्विकलेन्दुसमीक्षणम् ॥६२॥

परिषण्डाश्चतस्रोऽस्य दशसाहस्रिकान्तराः।
षोडशाष्टौ सहस्राणि चत्वारि द्वे च निर्गताः॥६३॥
करोटपाणयस्तासु मालाधाराः सदामदाः।
महाराजिकदेवाश्च पर्वतेष्वपि सप्तसु॥६४॥ LVP ध
मेरुमूर्ध्नि त्रयस्त्रिंशाः स चाशीतिसहस्र दिक्।
विदिक्षु कूटाश्चत्वारः उषिता वज्रपाणिभिः॥६५॥
मध्ये सार्धद्विसाहस्रपार्श्वमध्यर्धयोजनम्।
पुरं सुदर्शनं नाम हैमं चित्रतलं मृदु॥६६॥
सार्धद्विशतपार्श्वोऽत्र वैजयन्तो बहिः पुनः।
तच्चैत्ररथपारुष्यमिश्रनन्दनभूषितम्॥६७॥
विंशत्यन्तरितान्येषां सुभूमीनि चतुर्दिशम्।
पूर्वोत्तरे पारिजातः सुधर्मा दक्षिणावरे॥६८॥
तत ऊर्ध्वं विमानेषु देवाः कामभुजस्तु षट्।
द्वन्द्वालिंगन-पाण्याप्ति-हसिते-क्षितमैथुनाः॥६९॥
LVP क्षण
पञ्चवर्षोपमो यावद्दशवर्षोपमः शिशुः। LVP शुः
संभवत्येषु संपूर्णाः सवस्त्राश्चैव रूपिणः॥७०॥
कामोपपत्तयस्तिस्रः कामदेवाः समानुषाः।
सुखोपपत्तयस्तिस्रो नवत्रिध्यानभूमयः॥७१॥

स्थानात्स्थानादधो यावत्तावदूर्ध्वं ततस्ततः।
नोर्ध्वं दर्शनमस्त्येषामन्यत्रर्द्धिपराश्रयात् ॥७२॥
चतुर्द्वीपकचन्द्रार्कमेरुकामदिवौकसः।
ब्रह्मलोकसहस्रं च साहस्रश्चूडिको मतः॥७३॥
तत्सहस्रं द्विसाहस्रो लोकधातुस्तु मध्यमः।
तत्सहस्रं त्रिसाहस्रः समसंवर्तसंभवः॥७४॥
जाम्बुद्वीपाः प्रमाणेन चतुःसार्धत्रिहस्तकाः।
द्विगुणोत्तरवृद्ध्या तु पूर्वगोदोत्तराह्वयाः॥७५॥
पादवृद्ध्या तनुर्यावत् सार्द्धक्रोशो दिवौकसाम्।
कामिनां रूपिणां त्वादौ योजनार्द्धं ततः परम्॥७६॥
अर्द्धार्द्धवृद्धिरूर्ध्वं तु परीत्ताभेभ्य आश्रयः।
द्विगुणद्विगुणो हित्वाऽनभ्रकेभ्यस्त्रियोजनम्॥७७॥
सहस्रमायुः कुरुषु द्वयोरर्द्धार्द्धवर्जितम्।
इहानियतमन्त्ये तु दशाब्दानादितोऽमितम्॥७८॥
LVP न्ते
नृणां वर्षाणि पञ्चाशदहोरात्रो दिवौकसाम्।
LVP वौ
कामेऽधराणां तेनायुः पञ्च वर्षशतानि तु॥७९॥
द्विगुणोत्तरमूर्ध्वानामुभयं रूपिणां पुनः।
नास्त्यहोरात्रमायुस्तु ~~कल्प~~ कल्पैः स्वाश्रयसम्मितैः॥८०॥

आरूप्ये विंशतिः कल्पसहस्राण्यधिकाधिकम् ।
महाकल्पः परीत्ताभात् प्रभृत्यर्धमधस्ततः ॥८१॥
कामदेवायुषा तुल्या अहोरात्रा यथाक्रमम् ।
संजीवादिषु षट्स्वीयुस्तैस्तेषां कामदेववत् ॥८२॥
अर्धं प्रतापनेऽवीचावन्तः कल्पं परं पुनः ।
LVP ल्पः पुनः
कल्पस्तिरश्चां प्रेतानां मासाह्ना शतपंचकम् ॥८३॥
LVP ह्र, ह्रः
वाहाद्वर्षशतेनैक तिलोद्धारक्षयायुषः ।
LVP द्वि
अर्बुदा विंशति गुणप्रति वृद्धायुषः परम् ॥८४॥
कुरुवर्ज्योऽन्तरा मृत्युः परमाण्वक्षरक्षणाः ।
रूपनामाध्वपर्यन्ताः परमाणुरणुस्तथा ॥८५॥
फ? लोहाप्पुंसा विगोच्छिद्ररजोलिक्षा तदुद्भवाः ।
LVP प्ं LVP छि
यवस्तथाङ्गुलीपर्व ज्ञेयं सप्तगुणोत्तरम् ॥८६॥
चतुर्विंशतिरङ्गुल्यो हस्तो हस्तचतुष्टयम् ।
धनुः पञ्चशतान्येषां क्रोशोऽरण्यश्च तन्मतम् ॥८७॥
तेऽष्टौ योजनमित्याहुर्विंशं क्षणशतं पुनः ।
LVP शक्ती
तं क्षणस्ते पुनः षष्टिर्लवत्रिंशद्गुणोत्तराः ॥८८॥
LVP तत्क्ष
त्रयो मुहूर्ता होरात्रमासा द्वादशमासकः ।
संवत्सरस्सोनरात्रः कल्पो बहुविधः स्मृतः ॥८९॥

संवर्तकल्पो नारकासंभवाद्भाजनक्षयः।

विवर्तकल्पः प्राग्वायोर्यावन्नारकसम्भवः॥ ९०॥

अन्तः कल्पोऽमिताद्यावद्दशवर्षायुषस्ततः।

उत्कर्षा अपकर्षाश्च कल्पा अष्टादशापरे॥ ९१॥

उत्कर्ष एकस्तेऽशीतिसहस्राद्यावदायुषः।

इति लोको विवृत्तोऽयं कल्पां तिष्ठति विंशतिम्॥ ९२॥

LVP स्ति

विवर्ततेऽथ संवृत्त आस्ते संवर्तते समम्।

LVP च

ते ह्यशीतिर्महाकल्पस्तदसंख्यत्रयोद्भवम्॥ ९३॥

बुद्धत्वमपकर्षे तु शताद्यावत्तदुद्भवः।

द्वयोः प्रत्येकबुद्धानां खड्गः कल्पशतान्वयः॥ ९४॥

चक्रवर्तिसमुत्पत्तिर्नाधोऽशीतिसहस्रकात्।

सुवर्णरूप्यताम्रायश्चक्रिणस्तेऽधरक्रमात्॥ ९५॥

एकद्वित्रिचतुर्द्वीपा न च द्वौ सह बुद्धवत्।

प्रत्युद्यान ~~[illegible]~~ स्वयंयान कलहास्त्रजितोऽवधाः॥ ९६॥

देशस्थोत्तमपूर्णत्वैर्लक्षणातिशयो मुनेः।

प्रागासन् रूपिवत्सत्त्वा रसरागात्ततः शनैः॥ ९७॥

LVP संग्रहं — LVP मात्रादैः

मृ! आलस्यात् सन्निधिं कृत्वा साग्रहैः क्षेत्रपो भृतः।

ततः कर्मपथाधिक्यादपह्रासे दशायुषः॥ ९८॥

कल्पस्य शस्त्ररोगाभ्यां दुर्भिक्षेण च निर्गमः।
दिवसान् सप्त मासांश्च वर्षाणि च यथाक्रमम् ॥९९॥
संवर्तन्यः पुनस्तिस्रो भवन्त्यग्न्यम्बुवायुभिः।
ध्यानत्रयं द्वितीयादिशीर्षं तासां यथाक्रमम् ॥१००॥
तदपक्षालसाधर्म्यान्न चतुर्थेऽस्त्यनिञ्जनात्।
न नित्यं सह सत्त्वे तद्वि(द्धि???)मानोदयव्ययात् ॥१०१॥
सप्ताग्निनाद्भिरेकैवं गतेऽद्भिः सप्तके पुनः।
तेजसा सप्तकः पश्चाद्वायुसंवर्तनी ततः ॥१०२॥

॥ लोकनिर्देशो नाम तृतीयं कोशस्थानम् ॥

कर्मजं लोकवैचित्र्यं चेतना तत्कृतं च तत्।
चेतना मानसं कर्म तज्जं वाक्कायकर्मणी ॥१॥
LVP ज्जे
ते नु विज्ञप्त्यविज्ञप्ती कायविज्ञप्तिरिष्यते।
संस्थानं च गतिर्यस्मात् संस्कृतं क्षणिकं व्ययात्॥२॥
न कस्यचिद हेतुः स्याद्धेतुः स्याच्च विनाशकः।
द्विग्राह्यं स्यान्न चाणौ तद्वाग्विज्ञप्तिस्तु वाग्ध्वनिः॥३॥
त्रिविधामलरूपोक्तिवृद्ध्यकुर्वत्पथादिभिः।
क्षणादूर्ध्वमविज्ञप्तिः कामाप्तातीतभूतजा॥४॥
स्वानि भूतान्युपादाय कायवाक्कर्म साश्रवम्।
अनाश्रयं यत्र जातोऽविज्ञप्तिरनुपात्तिका॥५॥

नैष्यन्दिकी च सत्वाख्या निष्यन्दोपात्तभूतजा।
समाधिजौपचयिकानुपात्ताभिन्नभूतजा ॥६॥
नाव्याकृतास्त्यविज्ञप्तिस्त्रिधान्यदशुभं पुनः
कामे रूपेऽप्यविज्ञप्तिर्विज्ञप्तिः सविचारयोः ॥७॥
कामेऽपि निवृता नास्ति समुत्थानमसद्यतः।
परमार्थशुभो मोक्षः स्वतो मूलह्रीपत्रपाः ॥८॥
संप्रयोगेण तद्युक्ताः समुत्थानात्क्रियादयः।
विपर्ययेणाकुशलं परमाव्याकृते ध्रुवे ॥९॥
समुत्थानं द्विधा हेतुतत्क्षणोत्थानसंज्ञितम्।
प्रवर्तकं तयोराद्यं द्वितीयमनुवर्तकम् ॥१०॥
प्रवर्तकं दृष्टिहेयं विज्ञानमुभयं पुनः।
मानसं भावनाहेयं पंचकं त्वनुवर्तकम् ॥११॥
प्रवर्तके शुभादौ हि स्यात्त्रिधाप्यनुवर्तकम्।
तुल्यं मुनेः शुभं वापि नोभयं तु विपाकजम् ॥१२॥
अविज्ञप्तिस्त्रिधा ज्ञेया संवरासंवरेतरा
संवरः प्रतिमोक्षाख्यो ध्यानजोऽनाश्रवस्तथा ॥१३॥
अष्टधा प्रतिमोक्षाख्यो द्रव्यतस्तु चतुर्विधः।
लिंगतो नामसंचारात् पृथक् ते चाविरोधिनः ॥१४॥

पंचाष्टदश सर्वेभ्यो वर्जेभ्यो विरतिग्रहात्।
उपासको पवासस्थ श्रमणो द्देशभिक्षुता॥१५॥
शीलं सुचरितं कर्म संवरश्चोच्यते पुनः।
आद्ये विज्ञप्त्यविज्ञप्ती प्रातिमोक्ष क्रियापथः॥१६॥
प्रतिमोक्षान्विता चाष्टौ ध्यानजेन तदन्वितः।
अनाश्रवेणार्यसत्वा अन्त्यौ चित्तानुवर्तिनौ॥१७॥
अनागम्ये प्रहाणाख्यौ तावानन्तर्यमार्गजौ।
संप्रज्ञान स्मृती द्वे तु मन इन्द्रिय संवरौ॥१८॥
LVPr:
प्रातिमोक्षस्थितो नित्यमात्यागाद्वर्तमानया
अविज्ञप्त्यान्वितः पूर्वात्क्षणादूर्ध्वमतीतया॥१९॥
तथैवासंवरस्थोऽपि ध्यानसंवरवान् सदा।
अतीताजातयाऽर्यस्तु प्रथमे नाभ्यतीतया॥२०॥
समाहितार्यमार्गस्थौ तौ युक्तौ वर्तमानया।
मध्यस्थस्यास्ति चेदादौ मध्ययोर्द्धिकालया॥२१॥
असंवरस्थः शुभयाऽशुभया संवरे स्थितः।
अविज्ञप्त्यान्वितो यावत् प्रसादक्लेशवेगवान्॥२२॥
Ms तः?
मध्यया तु युताः सर्वे कुर्वन्तामध्ययान्विताः।
अतीतया क्षणादूर्ध्वमात्यागान्नास्त्यजा तया॥२३॥

मात्या? मत्या?

र्द्ध? र्द्ध?

निवृतानिवृताभ्यां च नातीताभ्यां समन्वितः।
असंवरो दुश्चरितं दौ(दो:)शील्यं कर्म तत्पथः ॥२४॥
विज्ञप्त्यैवान्वितः कुर्वन् मध्यस्थो मृदुचेतनः।
त्यक्तानुत्पन्नविज्ञप्तिरविज्ञप्त्यार्यपुद्गलः ॥२५॥
ध्यानजो ध्यानभूम्यैव लभ्यतेऽनाश्रवस्तया।
आर्यया प्रातिमोक्षाख्यः परविज्ञापनादिभिः ॥२६॥
यावज्जीवं समादानमहोरात्रं च संवृतेः।
नासंवरोऽस्त्यहोरात्रं न किलैवं स गृह्यते ॥२७॥
काल्यं ग्राह्योऽन्यतो नीचै(:) स्थितेनोक्तानुवादिना।
उपवासः समग्राङ्गो निर्भूषेणानिशाक्षयात् ॥२८॥
शीलाङ्गान्यप्रमादाङ्गं व्रताङ्गानि यथाक्रमम्।
चत्वार्येकं तथा त्रीणि स्मृतिनाशो मदश्च तैः ॥२९॥
अन्यस्याप्युपवासोऽस्ति शरणं त्वगतस्य न।
उपासकत्वोपगमात् संवृत्तिस्तु भिक्षुवत् ॥३०॥
सर्वे चेत्संवृता एकदेशकार्यादयः कथम्।
तत्पालनात् किल प्रोक्ता मृद्वादित्वं यथा मनः ॥३१॥
बुद्धसंघकरान् धर्मानशैक्षानुभयांश्च सः।
निर्वाणं चैति शरणं यो याति शरणत्रयम् ॥३२॥

4)

मिथ्याचारातिगर्ह्यत्वात्सौकर्यादक्रियाप्तितः।

यथाभ्युपगमं लाभः संवरस्य न सन्ततेः॥ ३३।

मृषावादप्रसंगाच्च सर्वशिक्षाभ्यतिक्रमे।

प्रतिक्षेपणसावद्यान्माद्यादेवातिगुप्तये ॥३४।

सर्वोभयेभ्यः ~~कम~~ कामाप्तो वर्तमानेभ्य आप्यते।

मौलेभ्यः सर्वकालेभ्यो ध्यानानास्रवसंवरौ ॥३५॥

संवरः सर्वसत्वेभ्यो विभाषात्वङ्गकारणैः।

असंवरस्तु सर्वेभ्यो सर्वाङ्गेभ्यो न कारणैः ॥३६॥

असंवरस्याक्रियया लाभोऽभ्युपगमेन वा।

शेषाविज्ञप्तिलाभस्तु क्षेत्रादानादरेहणात् ॥३७।

प्रातिमोक्षदम (मद ???) त्यागः शिक्षानिक्षेपणाच्च्युतेः।

उभयव्यंजनोत्पत्तेर्मूलच्छेदान्निशात्ययात् ॥३८।

पतनीयेन चेत्येके सद्धर्मान्तर्द्धितोऽपरे।

? धनर्णवत्तु काश्मीरैरापन्नस्येष्यते द्वयम् ॥३९॥

भूमिसंचारहानिभ्यां ध्यानाप्तं ~~[illegible]~~ त्यज्यते शुभम्।

तथारूप्याप्तमार्यं तु फलाप्त्युत्तप्तिहानिभिः ॥४०॥

असंवरः संवराप्तिमृत्युद्विव्यंजनोदयैः।

? वेगादानक्रियार्थायुर्मूलच्छेदैस्तु मध्यमा ॥४१॥

कामाप्तं कुशलारूपं मूलच्छेदोर्द्ध्वजन्मतः।
प्रतिपक्षोदया[त्?]क्लिष्टमरूपं तु विहीयते ॥४१॥
नृणामसंवरो हित्वा षण्डपण्डद्विधाकृतीन्।
कुरूंश्च संवरोऽप्येवं देवानां च नृणां त्रयः॥४२॥
कामरूपजदेवानां ध्यानजोऽनाश्रवः पुनः।
ध्यानान्तरासंज्ञिसत्ववर्ज्यानामप्यरूपिणाम्॥४४॥
क्षेमाक्षेमेतरत् कर्म कुशलाकुशलेतरत्।
पुण्यापुण्यमनिंज्यं च सुखवेद्यादि च त्रयम्॥४५॥
कामधातौ शुभं कर्म पुण्यमानिंज्यमूर्द्ध्वजम्।
तद्भूमिषु यतः कर्म विपाकं प्रति नेञ्जति।।४६॥
सुखवेद्यं शुभं ध्यानात् आतृतीयादतः परम्।
अदुःखासुखवेद्यं तु दुःखवेद्यमिहाशुभम्॥४७॥
अधोऽपि मध्यमस्त्येके ध्यानान्तरविपाकतः।
आपूर्वाचरमः पाकः त्रयाणां चेष्यते यतः॥४८॥
स्वभावसम्प्रयोगाभ्यामालम्बनाविपाकतः।
संमुखीभावतश्चेति पञ्चधा वेदनीयता॥४९॥
नियतानियतं तच्च नियतं त्रिविधं पुनः।
दृष्टधर्मादिवेद्यत्वात् पंचधा कर्म केचन॥५०॥

चतुष्कोटिकमित्यन्ये निकायाक्षेपणं त्रिभिः।
सर्वत्र चतुराक्षेपः शुभस्य नरके त्रिधा॥ ५१॥
यद्विरक्तः स्थिरो बालस्तत्र नोत्पद्यवेद्यकृत्।
नान्यवेद्यकृदार्यः कामाग्रे वा स्थिरोऽपि न (न?)॥ ५२॥
द्वाविंशतिविधं कामेष्वाक्षिपत्यन्तराभवः।
दृष्टधर्मफलं तच्च निकायो ह्येक एव सः॥ ५३॥
? तीव्रक्लेशप्रसादेन मातृघ्नेन च यत्कृतम्।
? गुणक्षेत्रे च नियतं तत्पित्रोर्घातकं च यत्॥५४॥
दृष्टधर्मफलं कर्म क्षेत्राशयविशेषतः।
तद्भूम्यत्यन्तवैराग्याद्विपाके नियतं हि तत्॥५५॥
ये निरोधारणामैत्रीदर्शनार्हत्फलोत्थिताः।
तेषु कारणकार्यस्य फलं सद्योऽनुभूयते॥६०॥
कुशलस्यावितर्कस्य कर्मणो वेदना मता।
विपाकश्चैतसिक्येव कायिक्येवाशुभस्य तु॥६१॥
चित्तक्षेपो मनश्चित्ते स च कर्मविपाकजः।
भयोपघातवैषम्यशोकैश्चाकुरु कामिनाम्॥ ५८॥
वङ्कदोषकषायोक्तिः शाठ्यद्वेषजरागजे।
कृष्णशुक्लादिभेदेन पुनः कर्म चतुर्विधम्॥ ५९॥

अशुभं रूपं कामाप्तं शुभं चैव यथाक्रमम्।
कृष्णशुक्लोभयं कर्म तत्क्षयाय निराश्रवम्॥ ६०॥
धर्मक्षान्तिषु(?) वैराग्ये चानन्तर्यपथाष्टके
या चेतना द्वादशधा कर्म कृष्णक्षयाय तत्॥ ६१॥
नवमे चेतना या सा कृष्णशुक्लक्षयाय च [illegible]।
शुक्लस्य ध्यानवैराग्ये ष्वन्त्यानन्तर्यमार्गजा॥ ६२॥
अन्ये नरकवेद्यान्यकामवेद्यं द्वयं विदुः।
दृग्घेयं कृष्णमन्येऽन्यत् कृष्णशुक्लं तु कामजम्॥ ६३॥
अशैक्षं कायवाक्कर्म मनश्चैव यथाक्रमम्।
मौनत्रयं त्रिधा शौचं सर्वं सुचरितत्रयम्॥ ६४॥
अशुभं काय कर्मादि मतं दुश्चरितं त्रयम्।
अकर्मापि त्वभिध्यादि मनोदुश्चरितं त्रिधा॥ ६५॥
विपर्ययात् सुचरितं तदौदारिकसंग्रहात्।
दशकर्मपथा उक्ता यथायोगं शुभाशुभाः॥ ६६॥
अशुभाः षडविज्ञप्ति द्विधैकस्तेऽपि कुर्वतः।
द्विविधाः सप्तकुशला अविज्ञप्तिः समाधिजाः॥ ६७॥

सामन्तकास्तु विज्ञप्तिरविज्ञप्तिर्भवेन्नवा।
विपर्ययेण पृष्ठानि प्रयोगस्तु त्रिमूलजः ॥६८॥
तदनन्तरसम्भूतेरभिध्याद्यास्त्रिमूलजाः।
कुशलाः सप्रयोगान्ता अलोभ-द्वेष-मोहजाः ॥६९॥
वधव्यापादपारुष्यनिष्ठा द्वेषेण लोभतः।
परस्त्रीगमनाऽभिध्याऽदत्तादानसमापनम् ॥७०॥
मिथ्यादृष्टेस्तु मोहेन शेषाणां त्रिभिरिष्यते।
सत्त्वभोगावधिष्ठानं नामरूपं च नाम च ॥७१॥
समं प्राक् च मृतस्यास्ति न मौलोऽन्याश्रयोदयात्।
सेनादेश्चैककार्यत्वात् सर्वकर्तृवदस्ति सः ॥७२॥
प्राणातिपातः संचिन्त्य परस्याभ्रान्तिमारणम्।
अदत्तादानमन्यस्वस्वीक्रिया बलचौर्यतः ॥७३॥
[अगम्यागमनं काम]मिथ्याचारश्चतुर्विधः।
फ [अन्यसंज्ञोदितं] वाक्यमर्थाभिज्ञे मृषा वचः ॥७४॥
चक्षुः[श्रोत्रमनोविज्ञाना]नुभूतं त्रिभिश्च यत्।
तद्दृष्ट-श्रुत-विज्ञात-मतं चोक्तं यथाक्रमम् ॥७५॥

फ "अन्यथा संज्ञिनो वाक्यं" — [तत्त्वार्थसूत्रटीका ७।८]

पैशुन्यं क्लिष्टचित्तस्य [वचनं परभेदने]
पारुष्यमप्रियं सर्वं क्लिष्टं संभिन्नलापिता॥७६॥
अतोऽन्यत् क्लिष्टमित्यन्ये लपनागीतनाट्यवत्।
कुशास्त्रवच्चाभिध्या तु परस्वविषयस्पृहा॥७७॥
[व्यापादः सत्त्वविद्वेषो] नास्ति दृष्टिः शुभाशुभे।
मिथ्यादृष्टिस्त्रयो ह्यत्र पन्थानः सप्त कर्म च॥७८॥
मूलच्छेदस्त्वेदद्दृष्ट्या कामाप्तोत्पत्तिलाभिकः।
फलहेतूपवादिन्या सर्वथा क्रमशो नृषु॥७९॥
छिनत्ति स्त्री पुमान् दृष्टिचरितः सोऽसमन्वयः।
सन्धिः काङ्क्षास्तिदृष्टेः स्यान्नेहानन्तर्यकारिणः॥८०॥
युगपद् यावदष्टाभिरशुभैः सह वर्तते।
चेतना दशभिर्यावच्छुभैर्नैकाष्टपञ्चभिः॥८१॥
संभिन्नालापपारुष्यव्यापादा नरके द्विधा।
समन्वागमतोऽभिध्यामिथ्यादृष्टी कुरौ त्रयः॥८२॥
सप्तमः स्वयमप्यत्र कामेऽन्यत्र दशाशुभाः।
शुभास्त्रयस्तु सर्वत्र संमुखीभूतलाभतः॥८३॥

आरूप्यासंतिसत्त्वेषु लाभतः सप्त शोधिते।
संमुखीभावतश्चापि हित्वा सनरकान् कुरून् ॥८४॥
सर्वेऽधिपतिनिष्यन्दविपाकफलदा मताः।
दुःखनान्मारणादोजोनाशनात् त्रिविधं फलम् ॥८५॥
[1]लोभजं कायवाक्कर्म मिथ्याजीवः पृथक्कृतः।
दुःशोधत्वात् परिष्कारलाभोत्थं चेन्न सूत्रतः ॥८६॥
प्रहाणमार्गे समले सफलं कर्म पञ्चभिः।
चतुर्भिरमलेऽन्यच्च साश्रवं यच्छुभाशुभम् ॥८७॥
अनास्रवं पुनः शेषं त्रिभिरव्याकृतं च यत्।
चत्वारि द्वे तथा त्रीणि कुशलस्य शुभादयः ॥८८॥
अशुभस्य शुभाद्या द्वे त्रीणि चत्वार्यनुक्रमम्।
अव्याकृतस्य द्वे त्रीणि त्रीणि चैते शुभादयः ॥८९॥
सर्वेऽतीतस्य चत्वारि मध्यमस्याप्यनागताः।
मध्यमा द्वे अजातस्य फलानि त्रीण्यनागताः ॥९०॥
स्वभू[2]मिकस्य चत्वारि त्रीणि द्वे चान्यभूमिकाः।
शैक्षस्य त्रीणी शैक्षाद्या अशैक्षस्य तु कर्मणः ॥९१॥

1 रागजं- L.V.P.
2 मि [कास्तु] L.V.P.

४।५२-५९

धर्माः शैक्षादिका एकं फलं त्रीण्यपि च द्वयं।
ताभ्यामन्यस्य शैक्षाद्या द्वे द्वे पञ्च फलानि च॥५२॥
त्रीणि चत्वारि चैकस्य दृग्घेयस्य तदादयः।
ते द्वे चत्वार्यथ त्रीणि भावनाहेयकर्मणः॥५३॥
अप्रहेयस्य ते त्वेकं द्वे चत्वारि यथाक्रमम्।
अयोगविहितं क्लिष्टं विधिभ्रष्टं च केचन॥५४॥
एकं जन्माक्षिपत्येकमनेकं परिपूरकम्।
नाक्षेपिके समापत्ती अचित्ते प्राप्तयो न च॥५५॥
आनन्तर्याणि कर्माणि तीव्रक्लेशोऽथ दु[र्ग]तिः।
कौरवासंज्ञिसत्त्वाश्च मतमावरणत्रयम्॥५६॥
त्रिषु द्वीपेष्वानन्तर्यं षण्ढादीनां तु नेष्यते।
अल्पोपकारालज्जित्वात् शेषे गतिषु पञ्चसु॥५७॥
संघभेदस्त्वसामग्रीस्वभावो विप्रयुक्तकः।
अक्लिष्टाव्याकृतो धर्मः संघस्तेन समन्वितः॥५८॥
तदवद्यं मृषावादस्तेन भेत्ता समन्वितः।
अवीचौ पच्यते कल्पमधिकैरधिका रुजः॥५९॥

४।१००-१०७.

भिक्षुर्दृक्चरितो वृत्ती भिनत्त्यन्यत्र बालिशान्।
शास्तृमार्गान्तरक्षान्तौ भिन्नो न विवसत्यसौ ॥१००॥
चक्रभेदः स च मतो जम्बूद्वीपे नवादिभिः।
कर्मभेदस्त्रिषु द्वीपेष्वष्टाभिरधिकैश्च सः ॥१०१॥
आदावन्तेऽर्बुदात् पूर्वयुगाच्चोपरते मुनौ।
सीमायां चाप्यबद्धायां चक्रभेदो न जायते ॥१०२॥
उपकारिगुणक्षेत्रनिराकृतिविपादनात्।
व्यञ्जनान्तरितेऽपि स्यान् माता यच्छोणितोद्भवः॥ १०३॥
बुद्धे न ताडनेच्छस्य प्रहारान्नोर्द्ध(=र्ध्व) मर्हति।
नानन्तर्यप्रयुक्तस्य वैराग्यफलसम्भवः ॥१०४॥
संघभेदमृषावादोमहावद्यतमो मतः।
भवाग्रचेतना लोके महाफलतमा शुभे ॥१०५॥
दूषणं मातुरर्हन्त्या नियतिस्थस्य मारणम्।
बोधिसत्त्वस्य शैक्षस्य संघायद्वारहारिका ॥१०६॥
आनन्तर्यसभागानि पञ्चमं स्तूपभेदनम्।
क्षान्त्यनागामितार्हत्त्वप्राप्तौ कर्मातिविघ्नकृत् ॥१०७॥

४।१०८-११५

बोधिसत्त्वः कुतो यावद् यतो लक्षणकर्मकृत्।
सुगतिः कुलजोऽध्यक्षः पुमान् जातिस्मरोऽनिवृत् ॥१०८॥
जम्बूद्वीपे पुमानेव संमुखं बुद्धचेतनः।
चिन्तामयं कल्पशते शेष आक्षिपते हि तत् ॥१०९॥
एकैकं पुण्यशतजमसंख्येयत्रयान्तजाः।
विपश्यी दीपकृद् रत्नशिखी शाक्यमुनिः पुरा ॥११०॥
सर्वत्र सर्वं ददतः कारुण्याद्दानपूरणम्।
अंगच्छेदेऽप्यकोपात्तु रागिणः क्षान्तिशीलयोः ॥१११॥
[1]तिष्यस्तोत्रेण वीर्यस्य धीसमाध्योरनन्तरम्।
पुण्यं क्रियाऽथ तद् वस्तुत्रयं कर्मपथा[2] यथा ॥११२॥
दीयते येन तद्दानं पूजानुग्रहकाम्यया।
कायवाक्कर्म सोत्थानं महाभोग्यफलं च तत् ॥११३॥
स्वपरार्थोभयार्थाय नोभयार्थाय दीयते
तद्विशेषः पुनर्दातृ-वस्तु-क्षेत्रविशेषतः ॥११४॥
दाता विशिष्टः श्रद्धाद्यैः सत्कृत्यादि (हि?)!! ददात्यतः।
सत्कारोदाररुचिता कालानाच्छेद्यलाभिता ॥११५॥

1 पुष्य-L.V.P.
2 [पथो] L.V.P.

४।११६- १२३.

वर्णादिसम्पदा वस्तुसुरूपत्वं यशस्विता।

प्रियता सुकुमारत्वं सुखस्पर्शाङ्गता ततः ॥११६॥

गतिदुःखोपकारित्वगुणैः क्षेत्रं विशिष्यते।

अग्र्यं मुक्तस्य मुक्ताय बोधिसत्त्वस्य चाष्टमम् ॥११७॥

मातापितृग्लानधार्मकथिकेभ्योऽन्त्यजन्मने।

बोधिसत्त्वाय चामेया अनार्येभ्योऽपि दक्षिणा ॥११८॥

पृष्ठं क्षेत्रमधिष्ठानं प्रयोगश्चेतनाऽऽशयः।

एषां मृद्वधिमात्रत्वात् कर्ममृद्वधिमात्रता ॥११९॥

संचेतनसमाधिभ्यां निःकौकृत्याविपक्षतः।

[परिवारविपाका]च्च कर्मोपचितमुच्यते ॥१२०॥

चैत्ये त्यागान्वयं पुण्यं मैत्र्यादिवदगृह्णति।

कुक्षेत्रेऽपीष्टफलता फलबीजविपर्ययात् ॥१२१॥

फ [रूपं] L.V.P. | दौःशील्यमशुभं [रूपं]फ शीलं तद्विरतिर्द्विधा।

प्रतिक्षिप्ताच्च बुद्धेन विशुद्धं तु चतुर्गुणम् ॥१२२॥

* दौःशील्यं Ms. | दौःशील्यं* तद्धेत्वहतं तद्विपक्षसमाश्रितम्

समाहितं तु कुशलं भावना चित्तवासनात् ॥१२३॥

४।१२४-१२७.

स्वर्गीयशीलं प्राधान्यात् विसंयोगाय भावना।

चतुर्णां ब्राह्मपुण्यत्वं कल्पं स्वर्गेषु मोदनात् ॥१२४॥

धर्मदानं यथाभूतं सूत्राद्यक्लिष्टदेशना।

पुण्यनिर्वाणनिर्वेधभागीयं कुशलं त्रिधा ॥१२५॥

योगप्रवर्तितं कर्म ससमुत्थापकं त्रिधा।

लिपिमुद्रे सगणनं काव्यं संख्या यथाक्रमम् ॥१२६॥

सावद्या निवृता हीनाः क्लिष्टा धर्माः शुभाऽमलाः।

प्रणीताः संस्कृतशुभाः सेव्या मोक्षस्त्वनुत्तरः ॥१२७॥

कर्मनिर्देशो नाम चतुर्थं कोशस्थानम्

५।३-८.

[अथ अनुशयनिर्देशो नाम पञ्चमं कोशस्थानम्]

मूलं भवस्यानुशयाः षड् रागः[1] प्रतिघस्तथा[2]।
(पुनः)???
मानो[3]ऽविद्या[4] च दृष्टिश्च[5] विचिकित्सा[6] च तेषु नः ॥१॥
षड् रागभेदाः सप्तोक्ता भवरागो द्विधातुजः।
अन्तर्मुखत्वात् तन्मोक्षसंताव्यावृत्तये कृतः ॥२॥
दृष्टयः पञ्च सत्का[य]मिथ्यान्तग्राहदृष्टयः।
दृष्टिशीलव्रतपरामर्शाविति पुनर्दश ॥३॥
दशैते सप्त सप्ताष्टौ त्रिद्विदृष्टिविवर्जिताः।
यथाक्रमं प्रहीयन्ते कामे दुःखादिद[र्शनैः] ॥४॥
[चत्वारो] भावनाहेयास्त[ए]वा प्रतिघाः पुनः।
रूपधातौ तथाऽऽरूप्ये इत्यष्टानवतिर्मताः ॥५॥
भवाग्रजाः क्षान्तिवध्या दृग्घेया एव शेषजाः।
दृग्भावनाभ्यामक्षान्तिवध्या भावनयैव तु ॥६॥
आत्मात्मीयध्रुवोच्छेदनास्तिहीनाग्रदृष्टयः।
अहेत्वमार्गे तद्दृष्टिरेतास्ताः पञ्च दृष्टयः ॥७॥
ईश्वरादिषु नित्यात्मविपर्यासात् प्रवर्तते।
कारणाभिनिवेशोऽतो दुःखदृग्घेय एव सः ॥८॥

५।९-१६

~~सर्वत्रगा अनुशयाः सकलामनुशेरते।~~
दृष्टित्रयाद्विपर्यासचतुष्कं विपरीततः।
नितीरणात् समारोपात् संज्ञा-चित्ते तु तद्वशात्॥ ९॥
सप्तमाना नवविधास्त्रिभ्यो दृग्भावनाक्षयाः।
वधादिपर्यवस्थानं हेयं भावनया तथा॥ १०॥
विभवेच्छा न चार्यस्य संभवन्ति विधादयः।
नास्मिता दृष्टिपुष्टत्वात् कौकृत्यं नापि चाशुभम्॥११॥
सर्वत्रगा दुःखहेतुदृग्घेया दृष्टयस्तथा।
द्विमतिः सह ताभिश्च याऽविद्याऽवेणिकी च या॥१२॥
नवोर्द्ध(=र्ध्वा)लम्बना एषां दृष्टिद्वयविवर्जिताः।
प्राप्तिवर्ज्याः सहभुवो येऽप्येभिस्तेऽपि सर्वगाः॥१३॥
मिथ्यादृग्विमती ताभ्यां युक्ताऽविद्याथ केवला।
निरोधमार्गदृग्घेयाः षडनास्रवगोचराः॥१४॥
स्वभूम्युपरमो मार्गः षड्भूमिनवभूमिकः।
तद्गोचराणां विषयो मार्गो ह्यन्योन्यहेतुकः॥१५॥
न रागस्तस्य वर्ज्यत्वान्न द्वेषोऽनपकारतः।
न मानो न परामर्शौ शान्तशुद्धाग्रभावतः॥१६॥

५।१७-२४

सर्वत्रगा अनुशयाः सकलामनुशेरते।
स्वभूमिमालम्बनतः स्वनिकायमसर्वगाः॥१७॥
नानास्रवोर्द्ध(=र्ध्व)विषया अस्वीकाराद्विपक्षतः।
येन यः सम्प्रयुक्तस्तु स तस्मिन् सम्प्रयोगतः॥१८॥
ऊर्द्ध(=र्ध्व)मव्याकृताः सर्वे कामे सत्कायदर्शनम्।
अन्तग्राहः सहाभ्यां च मोहः शेषास्त्विहाशुभाः॥१९॥
कामेऽकुशलमूलानि रागप्रतिघमूढयः।
त्रीण्यव्याकृतमूलानि तृष्णाऽविद्यामतिश्च सा॥२०॥
द्वैधोर्द्ध(=र्ध्व)वृत्तेर्नातोऽन्यौ चत्वार्येवेति बाह्यकाः।
तृष्णादृग्मानमोहास्ते ध्यायित्रित्वादविद्यया॥२१॥
एकांशतो व्याकरणं विभज्य परिपृच्छ्य च।
स्थाप्यश्च मरणोत्पत्तिविशिष्टात्मान्यतादिवत्॥२२॥
रागप्रतिघमानैः स्यादतीतप्रत्युपस्थितैः।
यत्रोत्पन्नाऽप्रहीणास्ते तस्मिन् वस्तुनि संयुतः॥२३॥
~~सर्वकालास्तितोक्तित्वात् द्वयात् सद्विषयात् फलात्।~~
~~तदस्तिवादात् सर्वास्तिवादा इष्टाश्चतुर्विधाः॥२४॥~~

५।२५-३१

सर्वत्रानागतैरेभिः मानसैः साध्विके परैः।

अजैः सर्वत्र शेषैस्तु सर्वैः सर्वत्र संयुतः ॥२४॥

सर्वकालास्तितोक्तित्वाद् द्वयात् सद्विषयात् फलात्।

तदस्तिवादात् सर्वास्तिवादा इष्टाश्चतुर्विधाः ॥२५॥

ते भावलक्षणावस्थान्यथान्यथिकसंज्ञिताः।

तृतीयः शोभनोऽध्वानः कारित्रेण व्यवस्थिताः ॥२६॥

किं विघ्नकृत् कथं नान्यदध्वायोगस्तथा मतः।

अजातनष्टता केन गम्भीरा जातु धर्मता ॥२७॥

प्रहीणे दुःखदृग्घेये संयुक्तः शेषसर्वगैः।

प्राक् प्रहीणे प्रकारैः च शेषैस्तद्विषयैर्मलैः ॥२८॥

दुःखहेतुदृगभ्यासप्रहेयाः कामधातुजाः।

स्वकत्रयैकरूपाप्ताऽमलविज्ञानगोचराः ॥२९॥

स्वकाधरत्रयोर्द्वै(=ध्वै)काऽमलानां रूपधातुजाः।

आरूप्यजास्त्रिधात्वाप्तत्रयानाश्रवगोचराः ॥३०॥

निरोधमार्गदृग्घेयाः सर्वे स्वाधिकगोचराः।

अनास्रवास्त्रिधात्वन्त्यत्रयानाश्रवगोचराः ॥३१॥

५।३२-३९

दुःखहेतुदृगभ्यासहेया धातुत्रये ऽमलाः।
पञ्चाष्टदशवितानदशवितानगोचराः ॥ ३२॥
द्विधा सानुशयं क्लिष्टमक्लिष्टमनुशायकैः।
मोहात् कांक्षा ततो मिथ्यादृष्टिः सत्कायदृक् ततः ॥३३॥
ततोऽन्तग्रहणं तस्माच्छीलामर्शस्ततो दृशः।
रागः [struck out] स्वदृष्टौ मानश्च द्वेषोऽन्यत्रेत्यनुक्रमः॥३४॥
अप्रहीणादनुशयात् विषयात् प्रत्युपस्थितात्।
अयोनिशोमनस्कारात् क्लेशः सम्पूर्णकारणः ॥३५॥
कामे सपर्यवस्थाः क्लेशाः कामास्रवा विना
मोहेनानुशया एव रूपारूप्ये भवास्रवः ॥३६॥
अव्याकृतान्तर्मुखा हि ते समाहितभूमिकाः।
अत एकीकृता मूलमविद्येत्यास्रवः पृथक् ॥३७॥
तथौघयोगाद् दृष्टीनां पृथग्भावस्तु पाटवात्।
नास्रवेष्व सहायानां न किलास्यानुकूलता ॥३८॥
यथोक्ता एव साऽविद्या द्विधा दृष्टिविवेचनात्।
उपादानान्यविद्या तु ग्राहिका नेति मिश्रिता ॥३९॥

५।४०-४७

अणवोऽनुगताश्चैते द्विधा चाप्यनुशेरते।
अनुबध्नन्ति यस्माच्च तस्मादनुशया मताः॥४०
आस्रवन्त्याश्रवन्त्येते हरन्ति श्लेषयन्त्यथ।
उपगृह्णन्ति चेत्येषा मास्रवादिनिरुक्तयः॥४१॥
संयोजनादिभेदेन पुनस्ते पञ्चधोदिताः।
द्रव्यामर्शनसामान्यात् दृष्टी संयोजनान्तरम्॥४२॥
एकान्ताकुशलं यस्मात् स्वतन्त्रं चोभयं यतः।
ईर्ष्यामात्सर्यमेषूक्तं पृथक् संयोजनद्वयम्॥४३॥
पञ्चधावरभागीयं द्वाभ्यां कामानतिक्रमः।
त्रिभिस्तु पुनरावृत्तिर्मुखमूलग्रहात् त्रयम्॥४४॥
आगन्तुका मता मार्गविभ्रमो मार्गसंशयः।
इत्यन्तराया मोक्षस्य गमनेऽतस्त्रिदेशना॥४५॥
पञ्चधैवोर्द्ध (=र्ध्व)भागीयं द्वौ रागौ रूप्यरूपिजौ।
औद्धत्यमानमोहाश्च विद्वशाद् बन्धनत्रयम्॥४६॥
येऽप्यन्ये चैतसाः क्लिष्टाः संस्कारस्कन्धसंज्ञिताः।
क्लेशेभ्यस्तेऽप्युपक्लेशास्ते तु न क्लेशसंज्ञिताः॥४७॥

५।४८-५५.

आह्रीक्यमनपत्राप्यमीर्ष्यामात्सर्यमुद्धवः।
कौकृत्यं स्त्यानमिद्धं च पर्यवस्थानमष्टधा ॥४८॥
क्रोधम्रक्षौ च रागोत्था आह्रीक्यौद्धत्यमत्सराः।
म्रक्षे विवादोऽविद्यात[ः] स्त्यानमिद्धानपत्रपाः ॥४९॥
कौकृत्यं विचिकित्सातः क्रोधेर्ष्ये प्रतिघान्वये।
अन्ये च षट् क्लेशमला माया शाठ्यं मदस्तथा ॥५०॥
प्रदाश[1] उपनाहश्च विहिंसा चेति रागजौ।
मायामदौ प्रतिघजे उपनाहविहिंसने ॥५१॥
दृष्ट्यामर्षात् प्रदाशस्तु शाठ्यं दृष्टिसमुत्थितम्।
तत्राह्रीक्यानपत्राप्यस्त्यानमिद्धोद्धवा द्विधा ॥५२॥
तदन्ये भावनाहेयाः स्वतन्त्राश्च तथा मलाः।
कामेऽशुभास्त्रयो द्वेवा परेणाव्याकृतास्ततः ॥५३॥
माया शाठ्यञ्च कामाद्यध्यानयोर्ब्रह्मवञ्चनात्।
स्त्यानोद्धत्यमदा धातुत्रयेऽन्ये कामधातुजाः ॥५४॥
समानमिद्धा दृग्घेया मनोविज्ञानभूमिकाः।
उपक्लेशाः स्वतन्त्राश्च षड्विज्ञानाश्रयाः परे ॥५५॥

1 प्रदास- Ms.

५।५६-६६.

सुखाभ्यां सम्प्रयुक्तो हि रागो द्वेषो विपर्ययात्।
मोहः सर्वैरसद्दृष्टिर्मनो दुःखसुखेन तु ॥५६॥
दौर्मनस्येन कांक्षाऽन्ये सौमनस्येन कामजाः।
सर्वेऽप्युपेक्षया ~~सर्वैः~~ स्वैः स्वैः यथाभूम्यूर्द्ध (=र्ध्व) ~~भूमिकाः~~ भूमिकाः ॥५७॥
दौर्मनस्येन कौकृत्यमीर्ष्या क्रोधो विहिंसनम्।
उपनाहः प्रदाशश्च मात्सर्यन्तु विपर्ययात् ॥५८॥
माया शाठ्यमथो म्रक्षो मिद्ध चोभयथा मदः।
~~ह्रीकतापञ्चता स्कन्धविघातविचिकित्सनात्~~ ॥
सुखाभ्यां सर्वगोपेक्षाँ चत्वार्यन्यानि पञ्चभिः ॥५९॥
कामे नीवरणान्येक विपक्षाहारकृत्यतः।
ह्रीकतापञ्चता स्कन्धविघातविचिकित्सनात् ॥६०॥
आलम्बनपरिज्ञानात् तदालम्बनसंक्षयात्।
आलम्बनप्रहाणाच्च प्रतिपक्षोदयात् क्षयः ॥६१॥
प्रहाणाधारदूरत्वदूषणाख्यश्चतुर्विधः।
प्रतिपक्षः प्रहातव्यः क्लेश आलम्बनान्मतः ॥६२॥

५।६३-७०

वैलक्षण्याद् विपक्षत्वाद् देशविच्छेदकालतः।
भूतशीलप्रदेशाध्वद्वयानामिव दूरता ॥६३॥
सकृत् क्षयो विसंयोगलाभस्त्वेषां पुनः पुनः।
प्रतिपक्षोदयफलप्राप्तीन्द्रियविवृद्धिषु ॥६४॥
परित्ता नव कामाद्यप्रकारद्वयसंक्षयः।
एका द्वयोः क्षयो द्वे ते तथोर्ध्वं (=ध्वं) तिस्र एव ताः॥ ६५॥
अन्या अवरभागीयरूपसर्वास्रवक्षयाः।
तिस्रः परित्ताः षट् क्षान्तिफलं ज्ञानस्य शेषिताः। ॥६६॥
अनागम्यफलं सर्वा ध्यानानां पञ्च वाऽथवा।
अष्टौ सामन्तकस्यैका मौलारूप्यत्रयस्य च॥६७॥
आर्यमार्गस्य सर्वा द्वे लौकिकस्यान्वयस्य च।
धर्मज्ञानस्य तिस्रस्तु षट् तत्पक्षस्य पञ्च च॥६८॥
अनास्रववियोगाप्तेर्भवाग्रविकलीकृतेः।
हेतुद्वयसमुद्घातात् परित्ता धात्वतिक्रमात्॥६९॥
नैकया पञ्चभिर्यावद् दर्शनस्थः समन्वितः।
भावनास्थः पुनः षड्भिरेकया वा द्वयेन वा॥७०॥

5।73.

तासां संकलनं धातुवैराग्यफललाभतः।

एकां द्वे पञ्च षट् कश्चिज्जहात्याप्नोति पञ्च न ॥73

अनुशयनिर्देशो नाम पञ्चमं कोषस्थानम्।

६।३-८

[अथ मार्गप्रहाणनिर्देशो नाम षष्ठं कोशस्थानम् ]

क्लेशप्रहाणमाख्यातं सत्यदर्शनभावनात्।
द्विविधो भावनामार्गो दर्शनाख्यस्त्वनास्रवः ॥१॥
सत्यान्युक्तानि चत्वारि दुःखं समुदयस्तथा।
निरोधो मार्ग इत्येषां यथाभिसमयं क्रमः ॥२॥
दुःखास्त्रिदुःखतायोगाद्यथायोगमशेषतः।
मनापा अमनापाश्च तदन्ये चैव सास्रवाः ॥३॥
यत्र भिन्ने न तद्बुद्धिरन्यापोहे धिया च तत्।
घटाम्बुवत् संवृतिसत् परमार्थसदन्यथा ॥४॥
वृत्तस्थः श्रुतचिन्तावान् भावनायां प्रयुज्यते।
नामोभयार्थविषयाः श्रुतमय्यादिका धियः ॥५॥
व्यपकर्षद्वयवतो नासंतुष्टमहेच्छयोः।
लब्धे भूयः स्पृहाऽतुष्टिरलब्धेच्छा महेच्छता ॥६॥
विपर्ययात् तद्विपक्षौ त्रिधात्वाप्तामलौ च तौ।
अलोभ आर्यवंशाश्च तेषां तुष्ट्यात्मकास्त्रयः ॥७॥
कर्मान्त्येन त्रिभिर्वृत्तिस्तृष्णोत्पादविपक्षतः।
ममाहंकारवस्त्विच्छा तत्कालात्यन्तशान्तये ॥८॥

तत्रावतारोऽशुभया चानापानस्मृतेन च।

1 शृंखला L.V.P. अधिरागवितर्काणां सङ्कला[1] सर्वरागिणाम् ॥९॥

आसमुद्रास्थिविस्तारसंक्षेपादादिकर्मिकः।

पादास्थ्नि आकपालार्धत्यागात् कृतजयः स्मृतः॥१०॥

अतिक्रान्तमनस्कारो भ्रूमध्ये चित्तधारणात्।

अलोभो दशभूः कामदृश्यालम्बा नृजाऽशुभा॥११॥

आनापानस्मृतिः प्रज्ञा पञ्चभूर्वायुगोचरा।

कामाश्रया न बाह्यानां षड्विधा गणनादिभिः॥१२॥

गणनानुगमः स्थानं लक्षणाऽथ विवर्तना।

परिशुद्धिश्च बोढेयमानापानस्मृतिर्मता॥१३॥

आनापानौ यतः कायः सत्त्वाख्यावनुपात्तकौ।

नैष्यन्दिकौ नावरेण लक्ष्येते मनसा च तौ ॥१४॥

निष्पन्नशमथः कुर्यात् स्मृत्युपस्थानभावनाम्।

कायविच्चित्तधर्माणां द्विलक्षणपरीक्षणात्॥१५॥

प्रज्ञा श्रुतादिमय्यन्ये संसर्गालम्बनात् क्रमः।

यथोत्पत्तिचतुष्कं तु विपर्यासविपक्षतः॥१६॥

६।१७-२४:

स धर्मस्मृत्युपस्थाने समस्तालम्बने स्थितः ।
अनित्यदुःखतः शून्यानात्मतस्तान् विपश्यति ॥१७॥
तत उष्मगतोत्पत्तिस्तच्चतुःसत्यगोचरम् ।
षोडशाकारमूष्मभ्यो मूर्द्धानस्तेऽपि तादृशाः ॥१८॥
उभयाकरणं धर्मेणान्यैरपि तु वर्द्धनम् ।
तेभ्यः क्षान्तिर्द्विधा तद्वत् क्षान्त्या धर्मेण वर्द्धनम् ॥१९॥
कामाप्तदुःखविषया त्वधिमात्रा क्षणं च सा
तथाऽग्रधर्माः सर्वे तु पञ्चस्कन्धा विनाप्तिभिः ॥२०॥
इति निर्वेधभागीयं चतुर्धा भावनामयम् ।
अनागम्यान्तरध्यानभूमिकं द्वे त्वधोऽपि वा ॥२१॥
कामाश्रयाण्यग्रधर्मान् द्व्याश्रयान् लभतेऽङ्गना ।
भूमित्यागात् त्यजत्यार्यस्तान्यनार्यस्तु मृत्युना ॥२२॥
आद्ये द्वे परिहाण्या च मौलैस्तत्रैव सत्यदृक् ।
अपूर्वाप्तिर्विहीनेषु हानी द्वे असमन्वितिः ॥२३॥
मूर्द्धलाभी न मूलच्छित् क्षान्तिलाभ्यनपायगः ।
शिष्यगोत्राद्[1]विवर्त्य द्वे बुद्धः स्यात् त्रीण्यपीतरः ॥२४॥

1 गान्निवार्य ms.

आबोधेः सर्वमेकत्र ध्यानेऽन्त्ये शास्तृखड्गयोः।
प्राक् तेभ्यो मोक्षभागीयं क्षिप्रं मोक्षस्त्रिभिर्भवैः॥२५॥
श्रुतचिन्तामयं त्रीणि कर्माण्याक्षिप्यते त्रिषु।
लौकिकेभ्योऽग्रधर्मेभ्यो धर्मक्षान्तिरनास्रवा॥२६॥
कामदुःखे ततोऽत्रैव धर्मज्ञानं तथा पुनः।
शेषे दुःखेऽन्वयक्षान्तिज्ञाने सत्यत्रये तथा॥२७॥
इति षोडशचित्तोऽयं सत्याभिसमयस्त्रिधा।
दर्शनालम्बकार्याख्यः सोऽग्रधर्मैकभूमिकः॥२८॥
क्षान्तिज्ञानान्यनन्तर्यमुक्तिमार्गा यथाक्रमम्।
अदृष्टे दृष्टे दृङ्मार्गस्तत्र पञ्चदश क्षणाः॥२९॥
मृदुतीक्ष्णेन्द्रियौ तेषु श्रद्धाधर्मानुसारिणौ।
अहीनभावनाहेयौ फलाद्यप्रतिपन्नकौ॥३०॥
यावत् पञ्चप्रकारघ्नौ द्वितीयेऽर्वाग् नवक्षयात्।
कामाद्विरक्तादूर्ध्व (र्ध्वं) वा तृतीयप्रतिपन्नकौ॥३१॥
षोडशे तु फलस्थौ तौ यत्र यः प्रतिपन्नकः।
श्रद्धाधिमुक्तदृष्ट्याप्तौ मृदुतीक्ष्णेन्द्रियौ तदा॥३२॥

फले फलविशिष्टस्य लाभो मार्गस्य नास्त्यतः।

नाप्रयुक्तो विशेषाय फलस्थः प्रतिपन्नकः ॥३३॥

नवप्रकारा दोषा हि भूमौ भूमौ तथा गुणाः।

मृदुमध्याधिमात्राणां पुनर्मृद्वादिभेदतः ॥३४॥

अक्षीणभावनाहेयः फलस्थः सप्तकृत् परः।

त्रिचतुर्विधमुक्तस्तु द्वित्रिजन्मा कुलं कुलः ॥३५॥

आपञ्चमप्रकारघ्नो द्वितीयप्रतिपन्नकः।

भवेत् L.Y.P. | क्षीणषष्ठप्रकारस्तु सकृदागाम्यसौ पुनः[1] ॥३६॥

क्षीणसप्ताष्टदोषांश एकजन्मैकवीचिकः।

तृतीयप्रतिपन्नश्च सोऽनागामी नवक्षयात् ॥३७॥

सोऽन्तरोत्पन्नसंस्कारासंस्कारपरिनिर्वृतिः

ऊर्द्ध(र्ध्व)स्रोताश्च स[illegible] ध्याने व्यवकीर्णोऽकनिष्ठगः ॥३८॥

स प्लुतोऽर्धप्लुतः सर्वच्युतश्चान्यो भवाग्रगः।

आरूप्यगश्चतुर्धाऽन्य इह निर्वापकोऽपरः ॥३९॥

पुनस्त्रीन् त्रिविधान् कृत्वा नवरूपोपगाः स्मृताः।

तद्विशेषः पुनः कर्मक्लेशेन्द्रियविशेषतः ॥४०॥

ऊर्द्ध(ध्वं)स्रोतुरभेदेन सप्त सद्गतयो मताः।

सदसद्वृत्त्यवृत्तीभ्यां गतप्रत्यागतैश्च ताः॥४१॥

न परावृत्तजन्मार्यः कामे धात्वन्तरोपगः।

स चोर्द्ध(=ध्व)जश्च नैवाक्षसंचारपरिहाणिभाक्॥४२॥

1 रिच्यतिः L.V.P. | आकीर्यते चतुर्थं प्राक् [1] सिध्यति क्षणमिश्रणात्।

उपपत्तिविहारार्थं क्लेशभीरुतयाऽपि च॥४३॥

तत्पाश्चनिध्यात् पञ्चैव शुद्धावासोपपत्तयः।

निरोधलाभ्यनागामी कायसाक्षी पुनर्मतः॥४४॥

आभवाग्राष्टभागक्षिदर्हत्त्वप्रतिपन्नकः।

नवमस्याप्यनन्तर्यपथे वज्रोपमश्च सः॥४५॥

तत्क्षयाप्त्या क्षयज्ञानमशैक्षोऽर्हन्नसौ तदा।

लोकोत्तरेण वैराग्यं भवाग्रादन्यतो द्विधा॥४६॥

लौकिकेनार्यवैराग्ये विसंयोगाप्तयो द्विधा।

लोकोत्तरेण चेत्येके त्यक्ते क्लेशासमन्वयात्॥४७॥

भवाग्राध विमुक्तोर्द्ध(=ध्व)जातवत् त्वसमन्वयः।

अनास्रवेण वैराग्यमनागम्येन सर्वतः॥४८॥

ध्यानात् सामन्तकाद्वाऽन्यो मुक्तिमार्गस्त्रिभूजये।
नोर्द्ध्(=र्ध्व) सामन्तकादार्यैरष्टाभिः स्वोर्द्ध(=र्ध्व) भूजयः॥ ४९॥
विमुक्त्यनन्तर्यपथा लौकिकास्तु यथाक्रमम्।
शान्ताद्युदाराद्याकारा उत्तराधरगोचराः॥५०॥
यद्येकोप्यः क्षयज्ञानादनुत्पादमतिर्न चेत्।
क्षयज्ञानमशैक्षी वा दृष्टिः सर्वस्य साहृतः॥५१॥
श्रामण्यममलो मार्गः संस्कृतासंस्कृतं फलम्।
एका न नवतिस्तानि मुक्तिमार्गाः सहक्षयैः[1]॥५२॥
चतुःफलव्यवस्था तु पञ्चकारणसम्भवात्।
पूर्वत्यागोऽन्यमार्गाप्तिः क्षयसंकलनं फले॥५३॥
ज्ञानाष्टकस्य लाभोऽथ षोडशाकारभावना।
लौकिकाप्तं फलं मिश्रानास्रवप्राप्तिधारणात्॥५४॥
ब्राह्मण्यमेव तद् ब्रह्मचक्रं तु ब्रह्मवर्तनात्।
5ब्रह्मचक्रं - L.V.P. | ~~ब्रह्म~~ धर्मचक्रं तु दृङ्मार्ग आशुगत्याद्यरादिभिः॥५५॥
कामे त्र्याप्तिरन्त्यस्य त्रिषु नोर्द्ध(=र्ध्वं) हि दृक्पथः।
असंवेगादिह विधा तत्र निष्ठेति चागमात्॥५६॥

1[ इतः परं प्रतौ (Ms.) पत्रस्यैकस्य अनुपलब्धेः ---- सप्त त्रिंशत्तु तत्पक्षा (६ $\frac{3}{4}$)] इति पर्यन्ताः श्लोकाः L.V.P. कल्पनानुसारेण पूरिताः।

1 असमयविमुक्तोऽतः —L.V.P.

अर्हन्तः षण्मतास्तेषां पञ्च श्रद्धाधिमुक्तजाः।
विमुक्तिः सामयिक्येषामको – [redacted] V. G.
सामयिकी [तद्विमुक्ति]रकोप्याऽकोप्यधर्मणः ॥ ५७॥
[1] तोऽ
असमय[redacted]मुक्त[redacted] दृष्टिप्राप्तान्वयश्च सः।
तद्गोत्रा आदितः केचित् केचिदुत्ता[2]पनागताः ॥५८॥
[3] गोत्रात् चतुर्णां पञ्चानां फलाद्धानिर्न पूर्वकात्।
[4] शैक्षाऽनार्याश्च षड्गोत्रा दृङ्मार्गेण न संचरेत् ॥५९॥
प्राप्ताप्राप्तोपभोगेभ्यः परिहाणिस्त्रिधा मता।
अन्त्या शास्तुरकोप्यस्य मध्याऽप्यन्यस्य तु त्रिधा ॥६०॥
म्रियते न फलभ्रष्टो न च कार्यं करोति सः।
विमुक्त्यान[5]न्तर्यमार्गा नवाऽकोप्येऽतिसेवनात् ॥६१॥
[6] एकैकशो दृष्टिलाभेऽनास्रवा नृषु वर्धनम्।
अशैक्षो नव निश्रित्य भूमीः शैक्षस्तु षड् यतः ॥६२॥
सविशेषं फलं त्यक्त्वा फलमाप्नोति वर्धयन्।
द्वौ बुद्धौ श्रावकाः सप्त [7] चैते नवविधेन्द्रियाः ॥६३॥

२ ०नात् पुनः-L.V.P. | 3 चतुर्णां गोत्रात्-L.V.P. |

4 षड्गोत्रा अनार्यशैक्षा दृङ्मार्गे नेन्द्रियसंचारः ॥५९॥-L.V.P.

5 ०र्ग पथा-L.V.P. | 6 एकैकस्तु दृष्टिप्राप्ते L.V.P. |

7 ते सनवविधेन्द्रियाः-L.V.P. |

प्रयोगाक्षसमापत्तिविमुक्त्युभयतः[1] क्रियाश्च कृताः |
पुद्गलाः सप्त षड् वैते एवं मार्गत्रये [2]द्विशः ॥६४॥
निरोधलाभ्युभयतो विमुक्तः प्रज्ञयेतरः |
समापत्तीन्द्रियफलैः शैक्षस्य परिपूर्णता ॥६५॥
द्वाभ्यामशैक्षस्य चतुर्विधो मार्गः समासतः |
[3]प्रयोगानन्तर्यविमुक्तिविशेषपथाह्वयः ॥६६॥
ध्यानेषु मार्ग प्रतिपत् सुखा दुःखाऽन्यभूमिषु |
धन्धाभिज्ञा मन्दबुद्धेः क्षिप्राभिज्ञेतरस्य तु ॥६७॥
क्षयानुत्पादयोर्ज्ञानं बोधि[4] (स्तात्)? स्तदानुलोम्यतः |
सप्तत्रिंशत् तु तत्पक्षा] नामतो द्रव्यतो दश ॥६८॥
श्रद्धा वीर्यं स्मृतिः प्रज्ञा समाधिः प्रीत्युपेक्षणे |
प्रस्रब्धिशीलसंकल्पाः प्रज्ञा हि स्मृत्युपस्थितिः ॥६९॥
वीर्यं सम्यक्प्रहाणाख्यम् ऋद्धिपादाः समाधयः |
प्रधानग्रहणं सर्वे गुणाः प्रायोगिकास्तु ते ॥७०॥

1° यभाविताः — L.V.P. | २ द्विकम् — L.V.P. |

3 सविशेषविमुक्त्यानन्तर्यप्रयोगसाह्वयः — L.V.P. |

4 स्त[struck] दानुलोम्यतः — L.V.P. |

आदिकर्मिकनिर्वेधभागीयेषु प्रभाविताः।
भावने दर्शने चैव सप्तवर्गा यथाक्रमम् ॥७१॥
अनास्रवाणि बोध्यङ्गमार्गाङ्गानि द्विधेतरे।
सकलाः प्रथमे ध्यानेऽनागम्ये प्रीतिवर्जिताः॥७२॥
द्वितीयेऽन्यत्र संकल्पाद् द्वयोस्तद् द्वयवर्जिताः।
ध्यानान्तरे च शीलाङ्गैस्ताभ्यां च त्रिष्वरूपिषु ॥७३॥
1 मण्डाङ्ग L.V.P. कामधातौ भवाग्रे च बोधिमार्गाङ्ग[1]वर्जिताः।
त्रिसत्यदर्शने शीलधर्मावेत्यप्रसादयोः ॥७४॥
लाभो मार्गाभिसमये बुद्धतत्संघयोरपि।
धर्मः सत्यत्रयं बोधिसत्त्वप्रत्येकबुद्धयोः॥७५॥
मार्गश्च द्रव्यतस्तु द्वौ श्रद्धा शीलं च निर्मलाः
नोक्ता विमुक्तिः शैक्षाङ्गं बद्धत्वात् सा पुनर्द्विधा॥७६॥
असंस्कृता क्लेशहानमधिमुक्तिस्तु संस्कृता।
साङ्गं सैव विमुक्ती द्वे ज्ञानं बोधिर्यथोदिता॥७७॥

६।

विमुच्यते जायमानमशैक्षं चित्तमावृतेः।
निरुध्यमानो मार्गस्तु प्रजहाति तदावृतिम् ॥७८॥
असंस्कृतैव धात्वाख्या विरोधो रागसंक्षयः।
प्रहाण[धातुरन्येषां निरोध इति वस्तुनः]॥७९॥
[निर्विद्यते]दुःखहेतुक्षान्तिज्ञानैर्विरज्यते।
सर्वैर्जहाति यैरेवं चतुष्कोटिकसम्भवः॥८०॥

मार्गप्रहाणनिर्देशो नाम षष्ठं कोशस्थानम्

[अथ ज्ञाननिर्देशो नाम सप्तमं कोशस्थानम्]

७।१-९: नामलाः क्षान्तयो ज्ञानं क्षयानुत्पादधीर्न दृक्।
तदन्योभयथाऽऽर्या धीरन्या ज्ञानं दृशश्च षट् ॥१॥
सास्रवानास्रवं ज्ञानमाद्यं संवृतिसंज्ञकम्।
अनास्रवं द्विधा धर्मज्ञानमन्वयमेव च ॥२॥
सांवृतं सर्वविषयं कामदुःखादिगोचरम्।
धर्माख्यमन्वयज्ञानं तूर्ध्वदुःखादिगोचरम् ॥३॥
ते एव सत्यभेदेन चत्वार्येते चतुर्विधे
अनुत्पादक्षयज्ञाने ते पुनः प्रथमोदिते ॥४॥
दुःखहेत्वन्वयज्ञाने चतुर्भ्यः परचित्तवित् ॥
भूम्यक्षपुद्गलोत्क्रान्तं नष्टाजातं न वे[त्ति] तत् ॥५॥
न धर्मान्वयधीपक्षमन्योन्यं दर्शनक्षणौ।
श्रावको वेत्ति खड्गस्त्रीन् सर्वान् बुद्धोऽप्रयोगतः ॥६॥
क्षयज्ञानं हि सत्येषु परिज्ञातादिनिश्चयः।
न परिज्ञेयमित्यादिरनुत्पादमतिर्मता ॥७॥
स्वभावप्रतिपक्षाभ्यामाकाराकारगोचरात्।
प्रयोगकृतकृत्यत्वहेतूपचयतो दश ॥८॥
धर्मज्ञानं निरोधे यत् मार्गे वा भावना पथे।
त्रिधातुपक्षस्तत् कामधातोस्तु नान्वयम् ॥९॥

७।३०-

धर्मज्ञानान्वयं ज्ञानं षोडशाकारमन्यथा।

तथा च सांवृतं स्वैः स्वैः सत्याकारैश्चतुष्टयम्॥१०॥

तथा परमनोज्ञानं निर्मलं समलं पुनः।

ज्ञेयस्वलक्षणाकारमेकैकद्रव्यगोचरम्॥११॥

शेषे चतुर्दशाकारे शून्यानात्मविवर्जिते।

नामलः षोडशभ्योऽन्यश्चाकारोऽन्येऽस्ति शास्त्रतः॥१२॥

द्रव्यतः षोडशाकाराः प्रज्ञाकारस्तया सह।

आकारयन्ति सालम्बाः सर्वमाकार्यते तु सत्॥१३॥

त्रिधाद्यं कुशलान्यन्यान्याद्यं सर्वासु भूमिषु।

धर्माख्यं षट्सु नवसु त्वन्वयाख्यं तथैव षट्॥१४॥

ध्यानेष्वन्यमनोज्ञानं कामरूपाश्रयं च तत्।

कामाश्रयं तु धर्माख्यमन्यत् त्रैधातुकाश्रयम्॥१५॥

स्मृत्युपस्थानमेकं धीर्निरोधे परचित्तधीः।

त्रीणि चत्वारि शेषाणि धर्मधीगोच[रो]नव॥१६॥

नव मार्गान्वयधियो दुःखहेतुधियोर्द्वयम्।

चतुर्णां दश नैकस्य योऽन्या धर्माः पुनर्दश॥१७॥

त्रैधातुकाऽमला धर्मा अकृताश्च द्विधा द्विधा।
सांवृतं स्वकलापादन्यदेकं विद्यादनात्मतः ॥१८॥
एकतानान्वितो रागी प्रथमेऽनास्रवक्षणे।
द्वितीये त्रिभिरूर्द्ध(=र्ध्वं) तु चतुर्ध्वेकैकवृद्धिमान् ॥१९॥
यथोत्पन्नानि भाव्यन्ते क्षान्तिज्ञानानि दर्शने
अनागतानि तत्रैव सांवृतं चान्वयत्रये ॥२०॥
अतोऽभिसमयान्त्याख्यं तदनुत्पत्तिधर्मकम्।
स्वाधोभूमिनिरोधेऽन्त्यं स्वसत्याकारयान्तिकम् ॥२१॥
षोडशे षट् सरागस्य वीतरागस्य सप्त तु।
सरागभावनामार्गे तदूर्द्ध(=र्ध्वं) सप्त भावना ॥२२॥
सप्तभूमिजयाभिज्ञाऽकोप्याप्ताकीर्णभाविते।
आनन्तर्यपथेषूर्द्ध(=र्ध्व)मुक्तिमार्गाष्टकेऽपि च ॥२३॥
शैक्षोत्तापनमुक्ते वा षट् सप्त ज्ञानभावना
आनन्तर्यपथे षण्णां भवाग्रविजये तथा ॥२४॥
नवानां तु क्षयज्ञानेऽकोप्यस्य दशभावना।
तत्संचारेऽन्त्यमुक्तौ च प्रोक्ता शेषेऽष्टभावना ॥२५॥

यद्वैराग्याय यल्लाभस्तत्र वाऽधश्च भाव्यते।

साश्रवाश्च क्षयज्ञाने लब्धपूर्वं न भाव्यते ॥२६॥

प्रतिलम्भनिषेधाख्ये शुभसंस्कृतभावने।

प्रतिपक्षविनिर्धावभावने सास्रवस्य तु ॥२७॥

अष्टादशावेणिकास्तु बुद्धधर्मा बलादयः।

स्थानास्थाने दश ज्ञानान्यष्टौ कर्मफले नव ॥२८॥

ध्यानाद्यक्षाधिमोक्षेषु धातौ च प्रतिपत्सु तु।

दश वा संवृतिज्ञानं द्वयोः षट् दश वा क्षये ॥२९॥

प्राङ्निवासच्युतोत्पादबलध्यानेषु शेषितम्।

सर्वभूमिषु केनास्य बलमव्याहतं यतः ॥३०॥

नारायणं बलं काये सन्धिष्वन्ये दशाधिकम्।

हस्त्यादिसप्तकबलं स्प्रष्टव्यायतनं च तत् ॥३१॥

वैशारद्यं चतुर्धा तु यथाद्यदशमे बले।

द्वितीये सप्तमे चैव स्मृतिप्रज्ञात्मकं त्रयम् ॥३२॥

महाकृपा संवृतिधीः सम्भाराकारगोचरैः।

समत्वादाधिमात्र्याच्च नानाकरणमष्टधा ॥३३॥

सम्भारधर्मकायाभ्यां जगतश्चार्थचर्यया।
समता सर्वबुद्धानां नायुर्जातिप्रमाणतः॥३४॥
शिष्यसाधारणा अन्ये धर्माः केचित् पृथग्जनैः।
अरणाप्रणिधिज्ञानप्रतिसंविद्गुणादयः॥३५॥
संवृतिज्ञानमरणाध्याने ऽन्त्ये ऽकोप्यधर्मणः।
नृजानुत्पन्नकामाप्तसवस्तु क्लेशगोचराः॥३६॥
तथैव प्रणिधिज्ञानं सर्वालम्बं तु तत् तथा।
धर्मार्थयोर्निरुक्तौ च प्रतिभाने च सम्विदः॥३७॥
तिस्रो नामार्थविज्ञानमविवर्त्यं यथाक्रमम्।
चतुर्थी युक्तमुक्ताभिलापमार्गवशित्वयोः॥३८॥
वाङ्मार्गालम्बना चासौ नवज्ञानानि सर्वभूः।
दश षड् वाऽर्थसंवित् सा सर्वत्रान्ये तु सांवृतम्॥३९॥
कामध्यानेषु धर्मे विद् वाचि प्रथमकामयोः।
विकलाभिर्न तल्लाभी षडेते प्रान्तकोटिकाः॥४०॥
तत् षड्विधं ध्यानमन्त्यं सर्वभूम्यनुलोमितम्।
वृद्धिकाष्ठागतं तच्च बुद्धान्यस्य प्रयोगजः॥४१॥

७। ४२-४९

ऋद्धि-श्रोत्र मनः-पूर्वजन्म-च्युत्यु-पपत्-क्षये)
ज्ञानं साक्षात्क्रियाऽभिज्ञा षड्विधा मुक्तिमार्गधीः॥४२॥
चतस्रः संवृतिज्ञानं चेतसि ज्ञानपञ्चकम्।
क्षयाभिज्ञा बलं यावत् पञ्च ध्यान-चतुष्टये ॥४३॥
स्वाधोभूविषया [redacted] लभ्या उचितास्तु विरागतः।
तृतीया त्रीण्युपस्थानान्याद्यं श्रोत्रर्द्धिचक्षुषि ॥४४॥
अव्याकृते श्रोत्रचक्षुरभिज्ञे इतराः शुभाः ॥
त्रिस्रो विद्या अविद्यायाः पूर्वान्तादौ निवर्तनात् ॥४५॥
अशैक्ष्यन्त्या तदाख्ये तु द्वे तत्सन्तानसम्भवात्।
इष्टे शैक्षस्य नोक्ते तु विद्ये साऽविद्यसन्ततेः ॥४६॥
आद्या तृतीया षष्ठी च प्रातिहार्याणि शासनम्।
अग्र्यमव्यभिचारित्वाद्धितेष्टफलयोजनात् ॥४७॥
ऋद्धिः समाधिः गमनं निर्माणं च ततो गतिः।
शास्तुर्मनोजवाऽन्येषां वाहिन्यप्याधिमोक्षिकी ॥४८॥
कामाप्तं निर्मितं बाह्यं चतुरायतनं द्विधा।
रूपाप्तं द्वे तु निर्माणचित्तैः तानि पुनर्दश ॥४९॥

यथाक्रमं ध्यानफलं द्वे यावत् पञ्च नोर्ध्वजम्।
तल्लाभो ध्यानवाक् शुद्धात् तत् स्वतश्च ततोऽपि ते॥५०॥
स्वभूमिकेन निर्माणं भाषणं त्वधरेण च।
निर्मात्रैव सहाऽशास्तुरधिष्ठायान्यवर्तनात् ॥५१॥
मृतस्याप्यस्त्यधिष्ठानं नास्थिरस्यापरे तु न।
आदावेकमनेकेन जितायां तु विपर्ययात् ॥५२॥
अव्याकृतं भावनाजं त्रिविधं तूपपत्तिजम्।
[1]ऋद्धिर्मन्त्रौषधाद्याश्च कर्मजा चेति पञ्चधा ॥५३॥
दिव्ये श्रोत्राक्षिणी रूपप्रसादौ ध्यानभूमिकौ।
सभागाविकले नित्यं दूरसूक्ष्मादिगोचरे ॥५४॥
द्वित्रिसाहस्रका-ऽसङ्ख्यदर्शोऽर्हत्-खड्ग-दैशिकाः।
अन्यदप्युपपत्त्याप्तं तद्दृश्यो नान्तराभवः ॥५५॥
चेतोजन्म तु तत् त्रेधा तर्कविद्याकृतं च यत्।
जानते नारका आदौ नृणां नोत्पत्तिलाभिकम् ॥५६॥
ज्ञाननिर्देशो नाम सप्तमं कोशस्थानम् ॥

---

1 ऋद्धिमन्त्रौषधाद्यांश्च- Ms.।

८।१-९ [अथ समापत्तिनिर्देशो नाम अष्टमं कोशस्थानम्]

द्विधा ध्यानानि चत्वारि प्रोक्तास्तदुपपत्तयः।
समापत्तिः शुभैकाग्र्यं पञ्चस्कन्धास्तु सानुगम्॥१॥
विचारप्रीतिसुखवत् पूर्वपूर्वाङ्गवर्जितम्।
तथाऽऽरूप्याश्चतुःस्कन्धा अधोभूमिविवेकजाः॥२॥
विभूतरूपसंज्ञाख्याः सह सामन्तकैस्त्रिभिः।
नाऽऽरूप्ये रूपसद्भावो रूपोत्पत्तिस्तु चित्ततः॥३॥
आकाशानन्त्यविज्ञानानन्त्याकिञ्चन्यसंज्ञिकाः।
तथा प्रयोगाद् मान्द्यात्तु न संज्ञा नाप्यसंज्ञकः॥४॥
इति मौलं समापत्तिद्रव्यमष्टविधं त्रिधा।
सप्तास्वादनवच्छुद्धाऽनास्रवाण्यष्टमं द्विधा॥५॥
आस्वादनसम्प्रयुक्तं सतृष्णं लौकिकं शुभम्।
शुद्धकं तु तदास्वाद्यं लोकोत्तरमनास्रवम्॥६॥
पञ्चाद्ये तर्कचारौ च प्रीतिसौख्यसमाधयः।
प्रीत्यादयः प्रसादश्च द्वितीयेऽङ्गचतुष्टयम्॥७॥
तृतीये पञ्च तूपेक्षा स्मृतिः प्रज्ञा सुखं स्थितिः।
चत्वार्यन्त्ये सुखाऽदुःखोपेक्षास्मृतिसमाधयः॥८॥
द्रव्यतो दशचैकञ्च प्रस्रब्धिः सुखमाद्ययोः।

८|९/२-४७

श्रद्धा प्रसादः प्रीतिस्तु सौमनस्यं द्विधाऽऽगमात् ॥९॥

क्लिष्टे [redacted]वसत् प्रीतिसु[redacted]खं प्रसादः सम्प्रधीः स्मृतिः।
उपेक्षा स्मृतिशुद्धिश्च केचित् प्रस्रब्ध्युपेक्षणे ॥१०॥
अष्टाऽपक्षालमुक्तत्वाद् आनेञ्ज्यं तु चतुर्थकः ।
वितर्क-चारौ श्वासौ च सुखादि च चतुष्टयः ॥११॥
सौमनस्य सुखोपेक्षा उपेक्षा सुमनस्कता।
सुखोपेक्षे उपेक्षा-च विदो ध्यानोपपत्तिषु ॥१२॥
कायाक्षिश्रोत्रविज्ञानं विज्ञप्त्युत्थापकं च यत् ।
द्वितीयादौ तदाद्याप्तमक्लिष्टाव्याकृतं च यत् ॥१३॥
अतद्वान् लभते शुद्धं वैराग्येणोपपत्तितः।
अनास्रवं तु वैराग्यात् क्लिष्टं हान्युपपत्तितः ॥१४॥
तृतीयाद् यावदूर्ध्वाधोऽनास्रवानन्तरं शुभम्।
उत्पद्यते तथा शुद्धात् क्लिष्टं चापि स्वभूमिकम् ॥१५॥
क्लिष्टात् स्वं शुद्धकं क्लिष्टमेकं च धर्मशुद्धकम् ।
च्युतन्तु शुद्धकात् क्लिष्टं सर्वं क्लिष्टात्तु नोत्तरम् ॥१६॥
चतुर्धा शुद्धकं हानभागीयादि यथाक्रमम् ।
क्लेशोत्पत्ति स्वभूम्यूर्ध्वाऽनास्रवानुगुणं हि तत् ॥१७॥

८।१८-२६.

द्वे त्रीणि त्रीणि चैकं च हानभागाद्यनन्तरम् ।

गत्वाऽऽगम्य द्विधा भूमिरष्टौ क्लिष्टैकलङ्घिताः ॥१८॥

व्युत्क्रान्तकसमापत्तिर्विसभागतृतीयगा ।

स्वाधोभूम्याश्रया एव ध्यानारूप्या वृथाऽवरम् ॥१९॥

आर्याकिञ्चन्यसांमुख्याद् भवाग्रे त्वास्रवक्षयः ।

सतृष्णाः स्वभावालम्बा ध्यानं सद्विषयं शुभम् ॥२०॥

न मौलाः कुशलारूप्याः सास्रवाऽधरगोचराः ।

अनास्रवेण हीयन्ते क्लेशाः सामन्तकेन च ॥२१॥

अष्टौ सामन्तकान्येषां शुभाऽदुःखाऽसुखानि हि ।

आर्यं चाद्यं त्रिधा केचिदतर्कं ध्यानमन्तरम् ॥२२॥

त्रिधाऽदुःखाऽसुखं तच्च महाब्रह्मफलं च तत् ।

सवितर्कविचारोऽधः समाधिः परतोऽद्वयः ॥२३॥

अनिमित्तः समाकारैः शून्यताऽनात्मशून्यतः ।

प्रवर्तते प्रणिहितः सत्याकारैरतः परैः ॥२४॥

शुद्धाऽमला निर्मलास्तु ते विमोक्षमुखत्रयम् ।

शून्य[redacted]ता[redacted]शून्यताद्याख्यास्त्रयोऽपरसमाधयः ॥२५॥

आलम्बेते अशैक्षं द्वौ शून्यतश्चाप्यनित्यतः ।

अनिमित्तानिमित्तस्तु शान्ततोऽसंख्यया क्षयम् ॥२६॥

८।२७-३५

सास्रवा नृत्वकोप्यस्य सप्तसामन्तवर्जिताः।
समाधिभावना ध्यानं शुभमाद्यं सुखाय हि ॥२७॥
दर्शनायाऽ[illegible]ऽयभिज्ञेष्टा धीभेदाय प्रयोगजाः।
वज्रोपमोऽन्त्ये यो ध्याने सास्रवक्षयभावना ॥२८॥
अप्रमाणानि चत्वारि व्यापादादिविपक्षतः।
मैत्र्यद्वेषोऽपि करुणा मुदिता सुमनस्कता ॥२९॥
उपेक्षाऽलोभ आकारः सुखिता दुःखिता बत।
मोदन्तामिति सत्त्वाश्च कामसत्त्वास्तु गोचरः ॥३०॥
ध्यानयोर्मुदितान्यानि षट्सु केचित्तु पञ्चसु
न तैः प्रहाणं नृत्वेव जन्यन्ते त्र्यन्वितो ध्रुवम् ॥३१॥
अष्टौ विमोक्षाः प्रथमावशुभा ध्यानयोर्द्वयोः।
तृतीयोऽन्त्यः स चालोभः शुभाऽरूप्याः समाहिताः ॥३२॥
निरोधस्तु समापत्तिः सूक्ष्मसूक्ष्मादनन्तरम्
स्वशुद्धकाधरार्येण व्युत्थानं चेतसा [ततः] ॥३३॥
[कामाप्त] दृश्यविषयाः प्रथमा ये त्वरूपिणः।
तेऽन्वयज्ञानपक्षोर्ध्व स्वभूदुःखादिगोचराः ॥३४॥
अभिभ्वायतनान्यष्टौ द्वयमाद्यविमोक्षवत्।

८|३५/२-४३.

द्वे द्वितीयवदन्यानि पुनः शुभविमोक्ष[वत्] ॥३५॥

[दश कृ]त्स्नान्यलोभोऽष्टौ ध्यानेऽन्त्ये गोचरः पुनः।
कामा द्वे शुद्धकारूप्ये स्वचतुःस्कन्धगोचरे ॥३६॥
निरोध उक्तो वैराग्ये प्रयोगाप्यं तु शेषितम्
त्रिधात्वाश्रयमारू[प्यसंज्ञं] शेषं मनुष्यजम् ॥३७॥
हेतुकर्मफलाद्धात्वोरारूप्योत्पादनं द्वयोः।
ध्यानानां रूपधातौ तु ताभ्यां धर्मतयाऽपि च ॥३८॥
सद्धर्मो द्विविधः शास्तुरागमाधिगमात्मक[ः]।
[धाता]रस्तस्य वक्तारः प्रतिपत्तार एव च ॥३९॥
काश्मीरवैभाषिकनीतिसिद्धः प्रायो मयाऽयं कथितोऽभिधर्मः।
यद् दुर्गृहीतं तदिहास्मदागः सद्धर्मनीतौ मुनयः प्रमाणम् ॥४०॥
निमी[लिते शास्तरि लो]कचक्षुषि क्षयं गते साक्षिजने च भूयसा
अदृष्टतत्त्वैर्निरवग्रहैः कृतं कुतार्किकैः शासनमेतदाकुलम् ॥४१॥
गते हि शान्तिं परमां स्वयम्भुवि स्वयम्भुवः शासनधुर्यके[षु च]
[जगत्यनाथे]गुणघातिभिर्मलैर्निरङ्कुशैः स्वैरमिहात्र चर्यते ॥४२॥
इति कण्ठगतप्राणं विदित्वा शासनं मुनेः।
बलकालं मलानां च न प्रमाद्यं मुमुक्षुभिः ॥४३॥
॥ समापत्तिनिर्देशो नाम [अष्टमं कोशस्था]नम् ॥

९।९८ [अथ पुद्गलनिर्देशो नाम नवमं कोशस्थानम्]

सन्तानेन समर्थत्वाद् यथाऽग्निः सर्वभुग् मतः।
तथा सर्वविदेष्टव्यो न सकृत् सर्ववेदनात् ॥१॥
दृष्टिदंष्ट्रावभेदं च भ्रंशं चापेक्ष्य कर्मणाम्।
देशयन्ती [बुद्धा (धा) धर्मं व्या]घ्रीपोतापहारवत् ॥२॥
आत्मास्तित्वं ह्युपगतो भिन्नः स्याद् दृष्टिदंष्ट्रया।
[redacted] भ्रंशं कुश[ल]पोतस्य कुर्यादप्राप्यसम्भृतिम् ॥३॥
असत्त्वाद् भगवान् जीवं तत्त्वान्यत्वे[न] नावदत्।
नास्तीत्यपि च नावोचद् माभूत् प्राज्ञप्तिकोऽप्यसन् ॥४॥
यत्र हि स्कन्धसन्ताने शुभाशुभफलास्तिता।
जीवाख्या तत्र सा न स्याज्जीवनास्तित्वदेशनात् ॥५॥
प्रज्ञ[प्ति]मात्रं स्कन्धेषु जीव इत्यपि नावदत्।
[redacted] अभव्यः शून्यतां बोद्धुं तदानीं तादृशो जनः ॥६॥
तथा ह्यात्मास्ति नास्तीति पृष्टो वात्स्येन नावदत्।
आश्रयापेक्ष[याऽसिद्धः] सति त्वस्तीति नाह किम् ? ॥७॥
सर्वाकारं कारणमेकस्य मयूरचन्द्रकस्यापि।
नासर्वज्ञैर्ज्ञेयं सर्व[ज्ञ]बलं हि तज्ज्ञानम् ॥८॥

९।९-३३.

यद् गुरु यच्चा[redacted]सन्नं यच्चाभ्यस्तं कृतं च यत् पूर्वम्।

[पूर्वं पूर्वं] पूर्वं विपच्यते कर्म संसारे ॥९॥

कर्म तद्भावना तस्या वृत्तिलाभं ततः फलम्।

नियमेन प्रजानाति बुद्धादन्यो न सर्वथा ॥१०॥

इत्येतां सुविहितहेतुमार्गशुद्धां [बुद्धानां प्रवचनधर्म] तां निशम्य।

अन्धानां विविधकुदृष्टिचेष्टितानां तीर्थ्यानां मतमपवि[ध्य] यान्त्य-
नन्धाः ॥११॥

इमां हि निर्वाणपुरैकवर्तिनीं तथागतादित्यवचोंऽशुभा [स्वतीम्]।

[नि]रात्मतामार्यसहस्रवाहितां न मन्दचक्षुर्विवृतामपीक्षते ॥१२॥

इति दिङ्मात्रमेवेदमुपदिष्टं सुमेधसाम्।

व्रणदेशो विषस्येव स्वसा[मर्थ्य वि]सर्पिणः ॥१३॥

॥ पुद्गलनिर्देशो नाम नवमं कोशस्थानम् ॥

॥ अभिधर्मकोशकारिका समाप्ता कृतिर्वसुबन्धुपादानाम् ॥

॥ श्री जैनेन्द्रं शासनं विजयतेतमाम् ॥

| कोशस्थान ⟶ | कारिका |
|---|---|
| १ धातुनिर्देश ॥ | ४८. |
| २ इन्द्रिय ॥ | ७३. |
| ३ लोक ॥ | १०२. |
| ४ कर्म ॥ | १२७. |
| ५ अनुशय ॥ | ७३ |
| ६ मार्गप्रहाण ॥ | ८० |
| ७ ज्ञान ॥ | ५६ |
| ८ समापत्ति ॥ | ४३ |
| ९ पुद्गल निर्देश | १३ |

सर्वाग्रम् - ६३३ कारिकाः

[illegible] (जिल्ला पूना)

पुण्यपत्तन (= पुना) नगरे
फर्ग्युसनमहाविद्यालये (कॉलेज)
प्राध्यापकपदमलंकुर्वाणैः विश्वनाथ-
शास्त्रितनुजन्मभिर्महामतिश्री वासुदेव
(गोखले) शास्त्रिमहोदयैः सम्पादितं
तैरेव च समर्पितम् अभिधर्मकोशकारिका
ग्रन्थमवलम्ब्य कृतेयं प्रतिलिपिः
— आचार्यदेवश्रीमद्विजयसिद्धिसूरीश्वरप्र-
शिष्यमुनिराजश्री भुवनविजयपुत्रान्तेवासि-
ना मुनि जम्बूविजयेन। सं. २००४ ज्येष्ठकृष्ण ३०

( अभिधर्मकोश १।४३ कारिकाभाष्यस्यांशः )
तुलना: LVP. I, P. ८६- ९३)

विजानातीति। तद्यथा चक्षुः पश्यति किमेकेन चक्षुषा रूपाणि पश्यति। आहोस्विदुभाभ्यां? नात्र नियमः॥ उभाभ्यामपि चक्षुर्भ्यां पश्यति व्यक्तदर्शनात्॥ उभाभ्यामपि चक्षुर्भ्यां पश्यतीत्याभिधार्मिकाः। तथाहि द्वयोर्विवृतयोः परिशुद्धतरं दर्शनं भवति। एकस्मिंश्चोन्मीलिते द्विचन्द्रादिग्रहणं भवति नैकतरान्यथा(वा)भावात्। न चाश्रयच्छेदाद्विच्छेदप्रसंगो विज्ञानस्य देशाप्रतिष्ठितत्वात्। रूपवदिति। यदि चक्षुः पश्यति श्रोत्रं शृणोति यावन्मनो विजानातीति। किमेषां प्राप्तविषयः आहोस्विदप्राप्तः?

चक्षुः श्रोत्रमनोऽप्राप्तविषयम्॥ तथाहि दूराद्रूपं पश्यति। अक्षिस्थमञ्जनं न पश्यति। दूराच्छब्दं शृणोति। सति च प्राप्तविषयत्वे (द्विधं) वेदितव्यं॥ चक्षुः श्रोत्रमिह ध्यायिनाञ्चोपजायेत। घ्राणादिवत्। यद्यप्राप्तविषयं चक्षुः कस्मात् कस्मात् सर्वमप्राप्तं न पश्यति दूरं तिरस्कृतं च। कथं तावदयस्कान्तो न सर्वमप्राप्तमयः कर्षति। प्राप्तविष(य)त्वेऽपि चैतत् समानम्। कस्मान् न सर्वं प्राप्तं पश्यति अञ्जनं शलाकां वा। यथा च घ्राणादीनां प्राप्तो विषयो, न तु सर्वः सहभूगन्धाद्यग्रहणादेवं चक्षुषोऽप्यप्राप्तं(प्र)त्वं स्यान्न तु सर्वः। मनस्त्वरूपित्वात् प्राप्त-

मेवाशक्यं । केचित् पुनः श्रोत्रं प्राप्ताप्राप्तविषयं मन्यन्ते, कर्णा-
भ्यन्तरेऽपि शब्दश्रवणात् । शेषं तु घ्राणजिह्वाकायाख्यम् ।
त्रयमन्यथा ॥ प्राप्तविषयमित्यर्थः । घ्राणं कथं प्राप्तविषयं निरुच्छ्वा-
सस्य गन्धाग्रहणात् । कथं प्राप्तिर्नाम निरन्तरोत्पत्तिः । किं पुनः
परमाणवः स्पृशन्ति अन्योन्यमाहोस्विन्न ? न स्पृशन्तीति
कश्मीराः । किं कारणं ? यदि तावत् सर्वात्मना स्पृशेयुर्मिश्री-
भवेयुर्द्रव्याणि । अथैकदेशेन, सावयवाः प्रस[ज्ये]रन् । निरव-
यवाश्च परमाणवः । कथं तर्हि शब्दाभिनिष्पत्तिर्भवति ।
अत एव, यदि हि स्पृशेयुः हस्तो हस्तेऽभ्याहतः । सा घा (घा-
त्या? त्या?) उपलश्चोपले । कथं [सं] चित्त (तं) प्रत्याहतं न विशीर्यते । वायु-
धातुसन्धारितत्वात् । कश्चिद्धि वायुधातुर्विकिरणाय प्रवृत्तो यथा
संवर्तन्यां । कश्चित् संधारणाय यथा विवर्तन्यामिति । कथमि-
(दे) दानीं निरन्तरप्राप्त्या प्राप्तविषयं त्रयमुच्यते । तदेवं (वै!!) वा निरन्त-
रत्वं यन्मध्ये नास्ति किञ्चिदपि खलु । संघाताः सावयव-
त्वात् स्पृशन्तीत्यदोषः । एवं कृत्वा अयमपि ग्रन्थ उपपन्नो
भवति । विभाषायां किन्नु स्पृष्टहेतुकं स्पृष्टमुत्पद्यते
आहोस्विदस्पृष्टहेतुकमिति प्रश्नयित्वा आह- कारणं प्रति

~~कदाचित् स्पृष्टहेतुकमुत्पद्यते यदा विशीर्यते कदाचिदस्पृष्ट~~

~~वस्थानं स्यादिति भदन्तवसुमित्रः । न स्पृशन्ति~~

---

~~अयं~~ ((समाप्तोऽयं वसुबन्धुभाष्यांशः))

अयं तावच्छास्ता जगति विजि(दि)तः क्षीणविमति चेतिस्तत्त्वे बिन्नः ।१।
त्रिभवजनसंजातकरुणः ।
गुणारण्येऽगण्ये चरति भवभीभङ्गविगतः स संबुद्धो बोधौ
भवगामसुखे साम्यमगमत् ॥१॥ (આરંભના પાઠોની શુદ્ધિ શંકિત છે)

(अभिधर्मकोशकारिका)